BIBLIOTHECA INDICA
A COLLECTION OF ORIENTAL WORKS.

न्यायवार्त्तिकतात्पर्य्यपरिशुद्धिः

श्रीमदुदयनाचार्य्यविरचिता ।

श्रीवर्धमानोपाध्यायविरचित–न्यायनिबन्धप्रकाशाभिध-
व्याख्यासहिता ।

NYĀYA-VĀRTTIKA-TĀTPARYA-PARIŚUDDHI

BY

UDAYANĀCĀRYA.

WITH A GLOSS CALLED.
NYĀYA NIBANDHA-PRAKĀŚA

BY

VARDHAMĀNOPĀDHYĀYA.

EDITED BY

MAHĀMAHOPĀDHYĀYA VINDHYEŚVARĪPRASĀDA DVIVEDIN,

AND

PAṆḌITA LAKṢMAṆA ŚĀSTRĪ DRAVIḌA.

Work Number
205
Fasc. VIII.

Issue Number
1467.
New Series.

CALCUTTA :
Printed by the Baptist Mission Press.
Published by the Asiatic Society of Bengal, 1, Park Street,
1924.

E.

INDICA

Y

OF BENGAL.

...f works belonging to ...contains original text ...glish, and also biblio-

...9, and consists of an ...s was begun in 1860,

As a rule the issues in the series consist of fascicles of 96 100 pages print, though occasionally numbers are issued of ...le, triple or larger bulk and in a few cases even entire works have been published under a single issue number Several different works are always simultaneously in progress. Each issue bears a consecutive issue number The Old Series consists of 265 issues, in the New Series, till September, 1924, inclusive, 1469 issues have been published These 1734 issues represent 240 different works, these works again represent the following literatures —

Sanskrit Prakrit.
Rajasthani, Kashmiri, Hindi
Tibetan.
Arabic, Persian.

Several works published are partly or wholly sold out, others are still incomplete and in progress A few works, though incomplete, have been discontinued

Various price-lists and notices concerning the Bibliotheca Indica are available and may be had on application. Other lists are in preparation Revised lists are published from time to time.

The standard sizes of the Bibliotheca Indica are three :—

Demy (or small) octavo.
Royal (or large) octavo
Quarto.

The prices of the Bibliotheca Indica as revised in 19 are based (with some exceptions) on the following scal unit of 96 or 100 pages in a fascicle as the case may be —

व्यभिचारपर्यवसानमुपयुज्यते। व्यभिचारादिसिद्धौ कृत्यामुपाधितदभावपरीक्षाया निष्फलत्वात्। तस्मादन्योन्यव्याप्तिप्रदर्शनमात्रप्रयुक्ता व्यभिचारमुद्राव्याप्योपाधिमाह। यदा त्विति। [illegible] यतो न स्वाभाविको न निरुपाधिकस्ततोऽनियतो नाव्यभिचारीत्यर्थः।

ननूपाधिरन्यथा [illegible] सव्यभिचारत्वेन हेत्वाभासान्तरं स्यात् न च व्याप्यत्वासिद्धिः। सैव। उपाधिज्ञानस्यासिद्ध्युपजीवित्वे तस्य स्वतो दूषकत्वाभावात् **न ह्यन्यस्य साध्यव्यापकत्वज्ञानम् अन्यस्य साध्यव्याप्यत्वज्ञाने स्वतः प्रतिबन्धकं** व्यभिचारिज्ञानस्य च तद्द्वारकतया तद्ज्ञानस्य तथात्वात्। अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञानं [illegible]। तथाच व्यभिचारज्ञानजनकतया स दूषक इति दूषकताबीजं परामर्शविरोधित्वेनासिद्ध्युपजीव्योऽप्युपाधिः सिद्धसाधनवत् हेत्वाभासः पृथगित्यस्मत्पितृचरणाः।

सम्प्रदायविदस्तु। यस्यानुमितिकरणव्यतिरेकरूपत्वं तदुन्नायकत्वं वा स हेत्वाभासः उपाधिस्त्वसिद्ध्युन्नायकव्यभिचारोन्नायकः व्यभिचारव्याप्यताप्रतिसंधानं विना असिद्धेरुन्नेतुमशक्यत्वादिति नोपाधिः पृथग्घेत्वाभास इत्याहुः।

तस्मादिति उपाधिव्यभिचारयोर्व्याप्तिप्रदर्शनार्थमित्यर्थः। यत्र व्यभिचारिण्येकत्र साधने साध्यतदभावयोर्विरोधिनावच्छेदकं विना तदुभयसम्बन्धाऽभावादवश्यं साध्यसम्बन्धितावच्छेदकमस्ति तत्र साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं चोपाधिः। अतएव

अथ धूमादीनामपि वह्न्यादिभिः कथं स्वाभाविक इत्यत आह। स्वाभाविकस्त्विति। १

नन्वस्फुटे व्यभिचारे सफलमुपाधिपर्येषणं (१) तत्किमत्र सोऽस्फुट इत्यत आह। क्वचिद्व्यभिचारः स्यादशना-दिति। ....

ननु क्वचित्कदाचिद्व्यभिचारोऽपि स्यादयोग्यत्वाच्च न दृश्येतापीत्यत आह। अनुपलभ्यमानस्यापि कल्पना-नुपपत्तेः। .... अनुपलभ्यमानव्यभिचारकल्पना-[illegible] इत्यर्थः। अतो नियतोऽव्यभिचा-रीत्यर्थः॥

व्यभिचारे चावश्यमुपाधिरिति मंगन्तव्यम्. अन्यथा व्यभिचारादेवाग मकत्व सिद्धे व्यभिचारित्वेन तदनुमानवैयर्थ्यादित्यस्मत्पितृचरणाः।

ननु नियतस्याभावे साध्यस्वाभाविकत्वाभावो हेतुः स कथं निश्चित इत्यत आह। यत इति। नन्वेतावतैव धूमस्य वह्निव्याप्त्व सिद्धे किमधिकेनेत्यप्रसक्तप्रतिषेधमाशङ्क्याह। नन्विति। कल्पना सार्थमाह। ननु क्वचिदिति तनूपाधिदर्शनमेवानुपलभ्यमान-व्यभिचारकल्पनाहेतुः स्यादित्यत आह अनुपलभ्यमानेति। प्रत्यक्षो व्यभिचारोनास्त्येव तत्कल्पनाबीजं चोपाधिर्नास्तीत्यर्थः। अयोन-रुक्तमाह। अव्यभिचारीत्यर्थ इति। ननु संदिह्यमान उपाधि-रित्यनेनोपाधिसन्देह इति व्याप्तिनिश्चयप्रतिबन्धान्न तन्निश्चय

(१) सुपाध्यनुसरणमिति पु० १ प०।

ननूपाध्यभावेऽनुपलभ्यमानव्यभिचारकल्पना[1]नवकाशः, स एव उपाध्यभावः कुतस्त्य इत्याशङ्कते । न चेति । परिहरति । अवश्यमिति ।

उपाधिर्हि प्रमाण[2]पदवीमवतीर्ण एव वक्तव्यः । अन्यथा सर्वैः प्रमाणैः सर्वत्र सर्वदा सर्वेषां जात्या कश्चिदनुपलभ्यमानः स्यादुपाधिरिति शङ्का तदुत्पत्तावपि ब्रह्मणाऽप्यपनेतुमशक्या । नानाप्रमाणगोचरार्थसाक्षात्कारः अतः सर्वज्ञस्यापि स्वभावत एवानुपलभ्यः कश्चिदर्थो भवेत । भवेच्च सर्वप्रमाणापोढमपि कदाचिदद्वैतं प्रकृतिपुरुषौ वा निःस्वभावता वा जगतः वेदानां प्रामाण्यम् । तत्कथञ्चेत्यवदनादावपि भिक्षुः प्रवर्तेत ।

अथ सन्देहात् प्रवृत्तिरिति चेत् । यत्र प्रमाणानि

इत्यप्रकृत वस्तुगतेः प्रकृतत्वादित्यन्यथाशंकामाह । ननूपाध्यभाव इति । तथा च वस्तुगताविनाक्षेप इति नाऽप्रकृतत्वमिति भावः । ननु वस्तुगत्याक्षेपस्तु 'अवश्य शङ्कया भाव्य'मित्यनेन परिहृतः शङ्काया अप्रस्तुतत्वादित्यभिप्रेत्य परिहारस्य स्फुटत्वमाह । परिहरतीति । यथास्य परिहारस्तथास्माभिर्वक्ष्यत इति भावः । तदेवाह । उपाधिर्हीति । जात्या-स्वभावतः । अस्मदादिभिरनुपलभ्योऽपि सर्वज्ञस्योपलंभः स्यादित्याह । नानेति

(१) ऽनुपपत्ति॰ १ पु॰ पा॰ । (२) प्रमाणपथम॰ २ पु॰ पा॰ ।

परिभूय शङ्कापिशाची प्रसरति कुतस्तत्रार्थसम्भावनापि। आस्तां तावत्परलोकप्रवृत्तिरिहलोकप्रवृत्तिरपि न स्यादित्याह। अन्तत इति। ११.१८

यद्यपि विशिष्टाहारानन्तरं भूयोभूयः पुष्टिधातुसाम्यादि दृश्यते, मरणं तु रोगानन्तरमेव, तथाप्याहारविशेषोमरणस्यैव हेतुः कदाचिद्भवेत्, कथमन्यथाऽन्ते तदनन्तरमेवोपलभ्यते। यत्त्वियन्तं कालं न मारितवान् तत्र मन्त्रप्रतिबद्धवह्निवत्केनचित्प्रतिबद्धत्वात्। स एव प्रतिबन्धकः पुष्ट्यादिहेतुरित्यपि सम्भाव्येत। रोगादिकमेव पुष्ट्यादिहेतुः तत्तु पुष्ट्यादिकाले अदृश्यत्वादेव नोपलभ्यते। न हि पुष्ट्यादिकारणैर्दृश्यैरेव भवितव्यमित्यपि कदाचित्स्यात्। यथा चाप्रामाणिकोपाधिशङ्कया व्यभिचारित्वशङ्कयानुमाना(दि)निवृत्तिस्तथाऽप्रामाणिकानर्थशङ्कयैव विशिष्टाहारभोजनादिनिवृत्तिरित्यर्थः। तस्मादुत्प्रेक्षितार्थनिश्चयवत्तच्छंकापि वन्ध्यैव, प्रमितस्य तु निश्चयवच्छङ्कापि समीहोपयोगिनीत्याह। तस्मादिति। ११.१८

तदयं सङ्क्षेपः। व्यभिचार एव प्रतिबन्धाभावः।

कथमन्यथेति। पूर्वाहाराजीर्णतायामाहारान्मरणस्योपलंभादित्यर्थः।
व्यभिचार एवेति। अव्यभिचरितसम्बन्धस्य व्याप्तित्वादित्यर्थः।

उपाधेरेव व्यभिचारशङ्का, प्रमाणनिश्चित एवोपाधि-

यदि त्वनौपाधिकः सबन्धोव्याप्तिस्तदा व्यभिचार इति सप्तम्यन्तं न प्रथमान्तं. तेन व्यभिचारे सत्येव प्रतिबन्धाभावः सोपाधिकत्वरूपोऽनौपाधिकत्वस्य व्याप्तित्वात् । उपाधेरेवेति । यद्यप्युपाधेर्व्यभिचारोन्नायकतया व्यभिचारनिश्चये न तत्संशयो युक्तस्तथापि साध्योपाध्योरिव साध्यसाधनयोरपि व्यभिचारादर्शनव्याप्तिग्राहकतौल्यन यथा साध्यव्यापकोपाधिव्यभिचारित्वात् साधनस्य साध्य व्यभिचारित्वमेवं साध्यव्याप्यसाधनाव्यापकत्वादुपाधेरेव साध्यव्यापकत्वमनुमीयते तथाचोपाधेर्न व्यभिचारनिश्चयः किन्तूभयत्र व्याप्तिग्राहकसाम्यात् व्यभिचारसंशय इति भावः । एतच्च साधनोपाध्योर्यत्रान्यतरत्रापि न व्याप्तिग्राहकतर्कावतारस्तदभिप्रायेणोक्तम् । यद्वा सन्दिग्धोपाधिमभिप्रेत्य एतदुक्तं तथा चोपाधेरेवोपाधिः शक्य एवेत्यर्थः ।

नन्वनौपाधिकः सम्बन्धो व्याप्तिर्नास्ति । तथाहि । यद्यपि साध्यव्यापकसाधनाव्यापकधर्मशून्यत्वज्ञाने व्यापकज्ञानस्य व्याप्तिरूपतयाऽन्योन्याश्रयः तद्वन्निष्ठात्यन्ताभावाऽप्रतियोगित्वस्य विरोधित्व रूपतया विरोधस्य च सहानवस्थाननियमात्मकत्वेन नियमस्य च व्याप्तिरूपतयान्योन्याश्रयः । प्रतियोगित्वं हि न विरोधित्वं गोत्वाश्वत्वयोर्मिथो विरोधित्वेपि प्रतियोगित्वाऽभावात् अन्योन्याभावप्रतियोगिनोरेकसमवायिवृत्तावपि तदभावाच्च, किंत्वभावाधिकरणयोः प्रतियोग्यनुयोगिनोरपि स्वरूपविशेष एव प्रतियोगित्वं स्वाभावविरहात्मकस्य तथापि वह्निधूमसम्बन्धेयत्किंचित्साध्या-

व्यापकधर्मशून्यत्वं नानौपाधिकत्वं तद्ग्रहेऽपि वह्नेर्धूमव्याप्यग्रहात्।
नापि प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मशून्यत्वं, तावता तयोः
सोपाधित्वस्यैवापत्तेः तादृशधर्मज्ञानं विना तदभावानिरूपणात्
सिद्धासिद्धिव्याघातात्। यावद्वह्निमद्व्यापके धूमवत्त्वाव्यापके वह्नि-
मत्त्वव्यापकत्वं वा निषिध्यत इति चेत्। न। तादृशधर्मि-
निषेधस्य व्यधिकरणतया धूमत्वेनायोगात्। साध्यव्यापकव्याप्यत्वे
चात्माश्रयात्। सोपाधेरपि साध्यव्यापकप्रमेयत्वादिधर्मव्याप्यत्वाच्च।
अत एव साध्यव्यापकसकलव्यापकत्वमित्यपि निरस्तम्। तथा सति
साध्यव्यापकसकलव्याप्यत्वं सोपाधित्वं भवेत् तच्चासिद्धं किञ्चित्सा-
ध्यव्यापकव्याप्यत्वे विद्यमाने सकलतद्व्यापकाव्याप्यत्वासम्भवात्। याव-
त्साध्यव्यापकं व्यापकं यस्य तत्त्वमनौपाधिकत्वं सोपाधौ तूपाधेरेव
साध्यव्यापकस्याव्यापकत्वादिति चेत्। न। सोपाधेरपि तथात्वात्।
साध्यधूमव्यापकार्द्रेन्धनस्यार्द्रेन्धनप्रभवत्वसाधनविशेषं वह्निव्यापकत्वात्।
एतेन प्रकृतसाधनाव्यापकमव्यापकं यस्यासौ, तत्त्वमित्यपास्तम्।
साधनतद्व्यापकस्य यावदार्द्रेन्धनस्य प्रत्येकं साध्यधूमाव्यापकत्वात्।
प्रत्येकं धूमस्यार्द्रेन्धनान्यत्वात्। साध्ययावद्व्यभिचारि तदव्यभि-
चारित्वं तदिति चेत्। न। साध्याव्यभिचारित्वस्यैव गमकत्वात्
शेषवैयर्थ्यात्। तन्मात्रस्य च दूषितत्वात्। अपि च यावत्साध्य-
व्यापकसत्त्वे साध्यसमनियतसत्तीति तावन्मात्रमेवास्तु शेषं व्यर्थम्।
तन्मात्रोक्तौ च साध्यव्यापकत्वं तन्निरुक्तौ व्यापकताभिधानवैयर्थ्यं
साध्यव्याप्यत्वस्यैव गमकत्वात्। न चैवापत्तिः व्याप्यताया अव्याप्य-
निरुक्तेः। अनौपाधिकत्वं न व्याप्तिः किन्तु तर्कादिवत्तद्ग्राहक-

मिति चेत्। तथापि यद्व्याप्तिज्ञानादनुमितिरुत्पद्यते का सा व्याप्तिः। नन्वयम् सम्बन्धमात्रमेव व्याप्तिर्व्यभिचारिसम्बन्धस्यापि केन चित्सह व्याप्तेः. यावद्धूमादिव्याप्तिर्विशिष्येव वक्तव्या। तन्न। तथाहि। किं व्याप्तिस्वरूपमिदमुच्यते। व्याप्तिपदप्रवृत्तिनिमित्तं वा। नाद्यस्तृतीयलिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे स्वस्यार्थान्तरत्वात् सम्बन्धमात्रज्ञानादनुमित्यनुत्पत्तेः। नान्त्यः सम्बन्धज्ञानेऽपि व्याप्तिपदाऽप्रयोगात्। न चाविनाभावो व्याप्तिः, स ह्यविनाभाव्यव्यभिचारेण वाभावः। तेना साध्यस्य व्यतिरेकेण योऽभावः साधनस्याभावः वा। उभयमपि व्यभिचारिसाधारणं तस्यापि क्वचित्साध्यसत्त्वे सत्त्वात्। क्वचित्साध्यव्यतिरेके व्यतिरेकाच्च। केवलान्वय्युभयस्यापि व्यतिरेकाच्च। नापि कार्त्स्न्येन सम्बन्धः। तथा हि। किं कृत्स्नस्य साधनस्य साध्येन सम्बन्धः आहो कृत्स्नस्य साध्यस्य साधनेन सम्बन्धः। नाद्यः कस्य अपि वह्निव्यक्तेः सकलधूमसम्बन्धस्याभावात्। वह्निमत्त्व साध्यं तच्च सकलधूमसहचरितमेवेति चेत्। न तर्हि कृत्स्नशब्दस्याऽर्थः तस्याऽव्यापकत्ववाचित्वात्। धूमत्वस्यैकत्वात्। न च साधनाधिकरणस्य कृत्स्नत्व विवक्षितं न साधनस्य, कृत्स्नधूमाधिकरणसम्बन्धस्य वह्निमत्त्वसाध्यत्वेति वाच्यम। एकव्यक्तिसामानाधिकरण्यो व्याप्यव्यापकयोः कार्त्स्नकत्वशब्दयोस्तदभावात्। अतएव नान्त्यः विषमव्याप्तेरभावाच्च। अतएव यावत्साधनाश्रयाश्रितसाध्यसम्बन्धो व्याप्तिरिति निरस्तम। नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्य व्याप्तिः, यावद्धर्मसामानाधिकरण्यं हि यावत्तद्धर्माधि

करणाधिकरणत्वं तच्चाऽप्रसिद्धं साधनसमानाधिकरणसकलस्थान-
सत्त्वाद्यधिकरणाप्रतीतेः । नापि स्वाभाविकः सम्बन्धः स्वाभाविकत्वं
हि स्वभावजन्यत्वं वा स्वभाव एव वा । आद्ये नित्यसम्बन्धाव्याप्तिः ।
द्वितीयतृतीययोश्च व्यभिचारिसाधारण्यम् । नाप्यव्यभिचरितः
सम्बन्धो व्याप्तिः स हि न साध्यात्यन्ताभाववदवृत्तित्वं द्रव्यत्वस्या-
व्याप्यवृत्तिसंयोगाव्याप्यत्वापत्तेः । नापि साध्यवद्भिन्नसाध्यात्यन्ता-
भाववदवृत्तित्वं साध्यवदन्यावृत्तित्वं वा, केवलान्वयिन्यसम्भवात् ।

अथ केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्य-
वदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वम्, तत्सामान्ये
पक्षधर्मतायाः प्रयोजकत्वात् । न च पक्षधर्मताज्ञानमात्रा-
दनुमित्यापत्तिः, सर्वत्र विशेषसामग्रीसापेक्षत्वेनैव सामान्यसामग्र्या
जनकत्वात् निर्विशेषस्य सामान्यस्याभावात्, विशेषद्वयसामग्र्याः
तत्राभावादित्युच्यते । तन्न । धूमे साध्यवदन्यावृत्तित्वाभावात्
वह्निमत्पर्वतादिव्यतिरिक्तेऽपि धूमसद्भावात् । न च साध्य-
वत्सामान्यान्योन्याभाववदवृत्तित्वं धूमस्य नास्तीति वाच्यम् । याव-
द्विशेषाभावकूटादेव सामान्याभावव्यवहारोपपत्तौ तदतिरिक्ते
तत्र मानाभावात् । अथ साध्यासामानाधिकरण्यानधिकरणत्वे
सति व्याप्यत्वं, केवलान्वयिनि साध्यसमानाधिकरणत्वं निरधि-
करणे आकाशादौ प्रसिद्धमिति चेत् । न । साध्यसमा-
नाधिकरणत्वं साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधि-
करणत्वं साध्यवैयधिकरण्यानधिकरणत्वं वा सर्वं केवलान्वयिन्य-
व्यापकम् । अथ प्रमेयत्वादावपि संयोगित्वादिना व्यधिकरणेन

धर्म्मेणावच्छिन्नोऽत्यन्ताभावोघट एव प्रसिद्धः तादृशधर्म्मावच्छिन्ना-भावस्य केवलान्वयित्वात् । न च तमादाय व्यभिचारिण्यपि साध्या-भाववद्वृत्तित्वमस्त्येवेतिवाच्यम् । साध्याभावसमानाधिकरणयावद त्यन्ताभावप्रतियोगित्वस्य विवक्षितत्वादिति वाच्यम । तन्न । तथा सति घट एव व्यभिचारापत्तेः । अथ साध्यत्वावच्छेदकावच्छिन्नप्रति योगिकाभाववद्वृत्तित्व व्यभिचारो, न च केवलान्वयिनस्तादृशा-भावोघटे, तर्हि तादृशसाध्याभावाऽसामानाधिकरण्य व्याप्तिः तथा चाप्रसिद्धिः तस्यैव तादृशाभावे मानाभावाच्चेत्यन्यत्र विस्तरः । नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्य व्याप्तिः यत्किंचिदत्यन्ताभाववति धूमस्य वृत्तेः संयोगादेरव्याप्य-वृत्तेर्द्रव्यत्वाव्याप्यतापत्तेश्च तस्य स्वसमानाधिकरणात्यन्ताभावप्रति-योगिसमानाधिकरणत्वात् । न च संयोगित्व द्रव्यत्वेनानसीयते तच्च व्याप्यवृत्त्येवेतिवाच्यम । संयोगस्य व्याप्यवृत्तितया तत्सम्बन्ध स्याप्यव्याप्यवृत्तित्वात । न च प्रतियोगिविरोधित्वमभावविशेषणम अव्याप्यवृत्त्यभावः प्रतियोगिसमानाधिकरणतयाऽविरोधीतियुक्तम । संयोग साध्ये प्रमेयत्वस्याव्यभिचारित्वप्रसङ्गात् । न हि गुण यः संयोगात्यन्ताभावः स प्रतियोगिसमानाधिकरणात्तस्माद्भिन्नः अधि-करणभेदेनाभावभेदाभावात् । नापि साधनवन्निष्ठान्योन्याभावा-प्रतियोगिसाध्यवत्कत्वं व्याप्तिः साधनवन्निष्ठान्योन्याभावाप्रतियोगि साध्यवद्यस्येति षष्ठ्यर्थो हि न व्याप्यव्यापकभावः व्याप्यत्वस्यानिरुक्तेः। नापि ज्ञाप्यज्ञापकभावः व्यभिचारिसाधारण्यात, वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च वह्निमान्पर्वतो धूम-

वह्निज्ञानमं न भवति इति प्रतीतेः यावद्विशेषाभावादेवोपपत्तौ सामान्याभावे मानाभावादित्युक्तम् । नापि साधनसमानाधिकरणयावद्धर्मनिरूपितव्यधिकरणत्वानधिकरणत्वं व्याप्तिः केवलान्वयिन्यसम्भवात् । अपि च सर्वत्र लक्षणे साध्यं यदि सिद्धिकर्मोच्यते तदा पर्वतीयधूमवह्न्योरिव व्याप्यव्याप्यव्यापकभावः स्यादिति साध्यसाधनपदेन व्यापकव्याप्ययोरभिधाने आत्माश्रय इति सङ्क्षेपः ।

अत्रास्मत्पितृचरणाः—यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगिप्रतियोगिकात्यन्ताभावाऽसामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वं, सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिन उपाधेरत्यन्ताभावस्तेन सह साधनस्य सामानाधिकरण्यं उपाधेः साधनाव्यापकत्वात् । यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यं वा । यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यं व्याप्तिः तदेव चाव्यभिचारित्वं अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावप्रतियोगित्वेऽपि । व्यधिकरणवह्निधूमयोर्न व्याप्तिः, किं तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना । न चैवं धूममात्रे न व्याप्तिरिति वाच्यम्, सर्वधूमव्यक्तेस्तथात्वात्, गुणे संयोगाभावस्य प्रतियोगिव्यधिकरण एव । वस्तुतो यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । तथा हि धूमस्य वह्निसम्बन्धे धूमत्वमवच्छेदकं धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धित्वे वह्नित्वं नावच्छेदकं धूमासम्बन्धिनि गतत्वेनातिप्रसक्तत्वात्, किं त्वार्द्रेन्धनप्रभववह्नित्वं तादृशं च व्याप्यमेव । न च यत्तद्भ्यां लक्षणेऽननुगमो दोषः । लक्ष्यस्याप्यननुगतत्वात् ।

त्वेन शङ्कनीयः। साधने सोपाधिः साध्ये निरुपाधि-रेव उपाधित्वेन निश्चेयः, अतोन्यश्चान्यथात्वेनेति। प्रमाणपरिदृष्टेप्येव कश्चिदुपाधिर्भविष्यतीत्यत आह। प्रयत्नेनेति।

किन्तु तत्तद्व्याप्तिज्ञानात्तत्तदनुमितिः। तथा चानुमितिहेतुव्याप्ति-स्वरूपजिज्ञासायां तदेव लक्षणं युक्तमित्यत्र मार्गो विधेयम्। साधने सोपाधिरिति। — — — रूपादन्योऽनुपाधित्वेन निश्चेय इत्यर्थः। अनौपाधिकत्वज्ञानं च न व्याप्तिग्राहकमितिवक्ष्यते तथात्वे वा व्यापकत्वमन्यदेव निरुक्तमिति नान्योन्याश्रयः इति वदन्ति। तन्न। — — — साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधेरव्याप्तिः। न च तयोरनुपाधित्वमेव, दूषकताबीजसत्त्वात् बाधानुन्नीतपक्षेतरेप्यतिव्याप्तेः। न च यत्र पक्षे साध्यमस्ति तत्र साध्याव्यापकत्वादेव न तस्योपाधित्वमिष्यते इति युक्तम्। पक्षा-तिरिक्त साध्याव्यापकत्वनिश्चयेऽप्युपाधित्वात् तस्य च तत्रापि सत्वात्। अन्यथा पक्षे साध्यसन्देहात्। अनुपाधित्वे उपाधिमात्र-मुच्छिद्येत साध्याव्यापकत्वानिश्चये — — — — — पक्षेतरत्वव्यतिरेकश्च न तथा केवलान्वयिनि साध्यात्यन्ताभावाऽप्रसिद्धेः केवलव्यतिरेकिणि प्रत्यनुमानस्य विरुद्धत्वात्। अन्वयव्यतिरेकिणि चाऽसाधारणत्वा-दिति चेन्न — — — भावनापक्षः एकेनैव भूयसां प्रतिबन्धात्। सन्दिग्धोपाधेरदूषकत्वापाताच्च। पक्षे तदभावस्य सन्दिग्धत्वात्। बाधोन्नीतस्यापि तस्यानुपाधित्वापत्तेश्च। यद्यपि — — — — —

तथापि साधनप्रतिपक्षाभिमते बाधे सत्युपाधिरस्त्येव। व्यभिचारो-न्नायकत्वेन दूषकत्वस्य च पक्षेतरत्वेपि सत्वात्। सत्प्रतिपक्षभावेन दूषकत्वेपि केवलव्यतिरेकिणः सपक्ष — — — प्रतिपक्षत्वसम्भ-वाच्च। किञ्चपर्व्वतावयववृत्त्यन्यत्त्वं पर्व्वतेतरद्रव्यत्वादिकं च उपाधिः स्यादेव व्यतिरेकेऽसाधारण्याभावात्। अथ पर्व्वतेतरान्यत्त्वादित्य-त्रेतरान्यत्वस्याऽसिद्धत्वादसिद्धिवारकं पर्व्वतपदमिति व्यतिरेके व्यर्थविशेषणत्वान्न तस्योपाधित्वमिति चेन्न। बाधोन्नीतस्यापि तस्यैवमनुपाधित्वापत्तेः। व्यर्थ — — व्यभिचारावारके तत्र तस्यैव प्रयोजकत्वात तस्य च प्रकृतेपि सत्वात् इतरान्यत्वाप्रसिद्ध्या तेन विना व्याप्तिग्रहासम्भवात्। अथोपाधिलक्षणे विपक्षाव्यावर्त्तक-विशेषणशून्यत्वं विशेषणं पर्व्वतेतरत्त्वादेश्च विशेषणस्य पक्षमात्र-व्यावर्त्तकतया विपक्षाव्यावर्त्तकत्वात्। आर्द्रेन्धनत्वादेश्च विशेषणस्य विपक्षायःपिण्डादिव्यावर्त्तकत्वात् एतच्च विशेषणव्यतिरेकेप्यस्ति विशिष्टव्यतिरेकात् बाधोन्नीते नाव्याप्तिः तत्र पक्षाभिमतस्य विपक्षत्वादित्युच्यते। तत्किं व्यभिचारवारकविशेषणवत्तया दूषकत्वमेवास्य नास्ति। ओमिति चेन्न। साध्यव्यापकत्वसाधना व्यापकत्त्वमात्रस्यैव तद्बीजत्वात्। व्यभिचारवारकविशेषणशून्य एव व्याप्तिग्रह इति चेन्न। सर्व्वस्यैव व्यभिचारवारक-विशेषणवत्त्वात्। न हि वस्तु व्यभिचारावारकविशेषणशून्यं भवति प्रमेयत्वादेः सर्वत्र सत्त्वात्। उपात्ते इति विशेषणा-न्नेवमिति चेन्न। यत्र क्वचिदुपात्तव्यभिचारावारकविशेषणस्याऽ-प्यव्यतिरेकात्। तत्रोपात्तव्यभिचारावारकविशेषणशून्यत्वं निव-

चितमिति चेन्न। सिद्धसिद्धिव्याघातात्। न हि तत्रोपात्तं तेन शून्यं चेति। अपि च व्यभिचारावारकं विशेषणं किं व्याप्तिविरोधि तदविरोधि वा? नाद्यः। शब्दोऽनित्यो गुणत्वे सति कार्यत्वादित्यत्र व्याप्तेर्विद्यमानत्वात्। नान्त्यः नित्यत्वे सति वृत्तिमत्त्वादित्यनेन प्रमाणेन स्वरूपसत्या व्याप्तेर्दूषणसम्भवात्, तथा च साध्यव्यापकत्वे सति साधनाव्यापकत्वं पक्षेतरत्वेऽप्यस्तीति तदभावात् साध्याभावः स्यादेवेति हेतोर्व्यभिचार एव। व्यभिचारे चावश्यमुपाधिरिति पक्षेतरत्वमेवोपाधिः स्यात्। अतएवासाधकमिदं सोपाधित्वादित्यत्रापि पक्षेतरत्वस्योपाधेः सम्भवादनुमानमात्रोच्छेदकतया न तदुपाधिरित्यपास्तम्। तस्य साध्यव्यापकतया व्यतिरेकस्य दूषणसम्बद्धत्वेन जातित्वाभावात्। भवतु वा कथञ्चित्पक्षेतरस्यानुपाधित्वं तथापि लक्षणमतिव्यापकमेवानुपाधावपि गतत्वात्। एतेन पक्षेतरत्वव्यावर्त्तकं विशेषणान्तरमपि प्रतिक्षिप्तम्। उपाधित्वाभावेपि दूषणसम्बद्धत्वात्। नापि लक्षणान्तरमुपाधेः सम्भवति। तद्धि न तावत्साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वं विषमव्याप्तोपाधावव्याप्तेः। न च विषमव्याप्तोनोपाधिः व्यभिचारोन्नायकत्वस्य दूषकताबीजस्य तत्रापि सत्त्वात्, इदं साधनमेतत्साध्यात्यन्ताभाववद्वृत्ति एतत्साध्याव्यापकाव्याप्यत्वादिति प्रयोक्तुं शक्यत्वादिति। न चैवं पक्षेतरत्वमुपाधिः स्यादिति वाच्यम्। प्रयोजनमात्रचतेरन्यथैव समाधास्यमानत्वात्। दूषणान्तरसङ्कीर्णत्वान्न विषमव्याप्त उपाधिरिति चेत्। न। सर्व्वोपाधिसाधारणत्वात् सर्व्वेषामेवोपाधीनां व्यभिचारादिसङ्करात्।

अथ साध्यप्रयोजको धर्म्म उपाधिरित्युच्यते। प्रयोजकत्वं च न न्यूनाधिकदेशवृत्तेः, तस्मिन्सत्यप्यभवतस्तेन विनापि भवतश्च तदप्रयोजकत्वात् किन्तु समनियतस्येति चेन्न। प्रयोजकत्वं व्यापकत्वं तदविषमव्याप्तस्याप्यस्ति। अथ व्याप्यत्वं, तदा व्यभिचारः। नहि समव्याप्तमेव व्याप्तं नोभयं समव्याप्तस्यैव समव्याप्तमित्युक्तौ साध्याविशेषात्। तस्माद्दूषणौपयिकं प्रयोजकत्वं वाच्यं। तच्च विषमव्याप्यस्यौत्सुक्यम्। अथ यद्धर्म्मोऽन्यनिष्ठतया भासते लोके तत्रैवोपाधिपदप्रयोगात् यद्वृत्तिव्याप्तिः साधनाभिमतनिष्ठतया भासते स एवोपाधिः स च न व्याप्यतामात्रेण व्यभिचारोन्नयनादिदूषकत्वबीजसम्भवात्। व्यापकत्वमपि तत्रान्तर्भाव्यमिति समव्याप्त एवोपाधिरिति चेन्न। शास्त्रेऽनुमानदूषणार्थमुपाधिव्युत्पादनं तच्च साध्यव्यापकत्वमात्रेणैवेति तत्रैवोपाधिपदप्रयोगात्। अथोपाधिर्नामासावुच्यते यदभावो व्यभिचारविरोधी, न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि, किन्तु समव्याप्तस्य, यत्र हि व्यभिचारस्तत्र साध्यसमव्याप्तमन्ततः साध्यमपि भवत्येवोपाधिः तस्यापि स्व प्रति व्यापकत्वे सति व्याप्यत्वात् साधनाव्यापकत्वाच्च। अभेदेऽपि व्याप्यव्यापकभावात्। अन्यथा कृतकत्वेनापि नित्यत्वे साध्ये कृतकत्वमेवोपाधिः स्यात्। अभेदेन तु व्यापकत्वे साधनव्यापकत्वादनुपाधिः। विषमव्याप्ते तु साध्यव्यापको यो धर्म्मस्तद्व्याप्यत्वमात्रान्न तद्व्याप्यत्वसिद्धिः शब्दो नित्यो गुणत्वादित्यत्र हि साध्यव्यापकं प्रमेयत्वं व्याप्यं भवति गुणत्वं च साध्येन न व्याप्तं जलपरमाणुरूपादौ व्यभिचारात्। समव्याप्तेन व्याप्तं तद्व्यभिचारि चेति व्याघात एवेत्युच्यते। तन्न

व्यभिचारे हि साध्यव्याप्यत्वमुक्तं न तु साध्यव्यापकव्याप्यत्वमपि. भवतैव व्यभिचारस्य दर्शितत्वात्।

न चैवं साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वमस्त्विति वाच्यम्। साध्यव्याप्यत्वमित्यत्रापि तदेवानौपाधिकत्वं वाच्य. तथा चान-वस्थितिः। यावदिति पदं साध्यव्यापके विशेषणं दत्तमेवानौ-पाधिकत्वलक्षणे इति नोक्तव्यभिचारः। नापि पक्षधर्मावच्छिन्न-साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं तथाहि यद्यपि वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र पक्षधर्माद्रव्यत्व तदवच्छिन्न-साध्यव्यापकं उद्भूतरूपवत्वमुपाधिरनेन सङ्गृह्यते तथाप्यार्द्रेन्धन प्रभववह्निमत्वादि केवलसाध्यव्यापक उपाधिर्नानेन सङ्गृह्यते। कोहि तत्र पक्षवृत्तिस्तदवच्छेदकः। अपि च शब्दोऽभिधेयःप्रमेय-त्वादित्यत्राश्रावणत्वमुपाधिःस्याद्भवति हि शब्दत्वादिजातौ साध्या-व्यापकमपि शब्दवृत्तिगुणत्वावच्छिन्नाभिधेयत्वस्याश्रावणत्वं व्यापकं साधनाव्यापकञ्च। नापि पक्षावृत्तित्वे सति साध्यव्यापकत्वमुपाधित्वं द्व्यणुकं सकर्तृकं कार्य्यत्वादित्यत्रानणुत्वस्योपाधित्वापत्तेः तद्धि द्व्यणुके पक्षे न वर्त्तते साध्यव्यापकं च भवति अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वस्यानुपाधित्वापत्तेः पक्षवृत्तित्वात्। नापि साधनवद्भिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं। तथाहि। यद्यपि ध्वंसो ध्वंसप्रतियोगी जन्यत्वादित्यत्र भावत्वमुपा धिरनेन सङ्गृह्यते। — — — — वृत्तितया साध्याव्यापकत्वेपि जन्यत्वावच्छिन्नसाध्यव्यापकत्वात्। तथाप्यार्द्रेन्धनप्रभवाग्निमत्वादेः पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधेस्तानेनाऽसङ्ग्रह इत्यव्याप्तिः जलं

प्रमेयं रसवत्त्वादित्यत्रैव रसत्वावच्छिन्नसाध्यव्यापकस्य पृथिवीत्वस्योपाधित्वप्रसङ्गः। इदमसाधकं सोपाधित्वादित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वादित्यत्र साधनावच्छिन्नत्वस्य वैयर्थ्यं साध्यव्यापकव्यभिचारित्वस्यैव गमकत्वात्। अतएव साध्यसाधनसम्बन्धाव्यापकत्वमुपाधित्वमिति निरस्तम्। अपिच पक्षत्रयेऽपि विशिष्टसाध्यव्यभिचारं साधयित्वा पश्चात्केवलसाध्यव्यभिचारः साधनीय इत्यर्थान्तरं केवलसाध्ये विप्रतिपत्तौ विशिष्टस्य तदविषयत्वात्। नापि यद्विशिष्टे साधने साध्यसामानाधिकरण्यं स उपाधिः शामभाटीनामप्युपाधित्वप्रसङ्गात्। तद्विशिष्टेऽपि साधने साध्यसम्बन्धात्। यद्विशिष्ट एवेति विवक्षितमिति चेत्। न। प्रमेयत्वादेरप्युपाधित्वप्रसङ्गात्। यद्विशिष्टे साधने साध्यसामानाधिकरण्यमस्त्येवेति चेन्न। गुरुत्वेन रसवत्त्वे साध्ये गन्धवत्त्वादेः साध्यव्यापकस्यापि उपाधित्वापत्तेः। नापि पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः यद्यपि पर्यवसितं साध्यं पक्षधर्मताबललभ्य यथा शब्दोनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवान् प्रमेयत्वादित्यत्र पर्यवसितं यत्साध्यमनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः। तेनैव हेतुना कृतकत्वे साध्येऽनित्यमुपाधिबलेन सङ्गृह्यते। तथापि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निःस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात् भवति हि नित्यद्रव्यसमवेतत्वं यत्पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकं च, अपि च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः तदसिद्धौ च कस्य व्यापकः, न हि सोपाधौ

पक्षधर्मतावच्छेदेन साध्यं सिद्ध्यति यद्व्यापक उपाधिः स्यात् । अथोपाधि-
मात्रव्यतिरेकिधर्मत्वं लक्षणं कश्चिदाधीनीतस्य पक्षेतरत्वस्याप्यु-
पाधित्वात् । तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधना-
व्यापकत्वं वह्निधूमोपाधेस्तु न लक्षणमिदं लक्ष्याभावात् । न च
पर्वतेतरत्वं वह्निधूमसम्बन्धे उपाधिः आपाद्याप्रसिद्धेः । न च पक्षे-
तरत्वं वह्निव्यापकं कुतो न भवतीति वाच्यम् । उपाधिलक्षणप्रस्तावे
एतस्याथान्तरत्वादिति मतम् । तन्न । अनुमितिप्रतिबन्धकज्ञान-
विषयत्वावच्छेदकत्वमुपाधित्वमिह निरूपयितुमुपक्रान्तं अन्यस्या
प्रयोजकत्वात्. तच्च न व्यतिरेकत्वमपि सहचारदर्शनादेस्तद्ग्राहकस्य
न्यत्वात्. तथाच विरुद्धोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्ष
व्यावर्तितव्यम्. न चैवम् । तथा च साध्यव्यापकत सन्देहात् न
पक्षेतरत्वमुपाधिरिति । तन्न । तथापि साध्यव्यापकतापक्षमात्रस्य
दूषकत्वाविरोधादिति ।

एवं प्राप्तेऽस्मत्पितृचरणाः यद्व्यभिचारित्वेन साधनस्य साध्यव्यभि-
चारित्वं स उपाधिरिति । उपाधिलक्षणं तु पर्यवसितसाध्यव्यापकत्वे
सति साधनाव्यापकत्वं यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्न
पर्यवसितं साध्यं, तत्रार्द्रेन्धनप्रभवत्वाद्युपाधौ महानसत्वादिरेव
तादृशोधर्मस्तदवच्छेदेन साध्यस्य धूमस्य प्रसिद्धेः पक्षधर्मतावच्छिन्न-
साध्यव्यापकोपाधौ साधनावच्छिन्नसाध्यव्यापकोपाधौ च साधनमेव.
तथा च तदवच्छिन्नसाध्यव्यापकोपाधिव्यभिचारेण साधनस्य साध्य-
व्यभिचारः स्यादेव व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारित्वनियमा
दतः साध्यव्यापकत्वसाधनाव्यापकत्व एव दूषकताबीजम् । न च

पक्षधर्मावच्छिन्नसाधनावच्छिन्नोपाधिव्यभिचारेण साधनस्य साध्य-व्यभिचारोन्नयनेऽर्थान्तरं विशेषणाव्यभिचारित्वेन निश्चिते साधने विशिष्टव्यभिचारस्य सिद्धतो विशेष्यव्यभिचारमादाय सिद्धेः पक्ष-धर्मताबलात् अन्यथा प्रतीतेरपर्य्यवसानात्। न च पक्षधर्म-ताबलात्साध्यसिद्धावर्थान्तरत्व अतिप्रसङ्गात। भवतु वा ततो-ऽर्थान्तरं तथापि हेत्वाभास एव अर्थान्तरस्य पुरुषदोषत्वात् तथा चाभासान्तरस्य तत्राभावादुपाधेरेव भावत्वादिस्तत्र दोषः। यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिर्व्य-भिचारोन्नायकत्वं च साक्षात्परम्परया वेति नार्थान्तरम्। न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं जले प्रमेय रसवत्वा-दित्यत्र पृथिवीत्वमुपाधिः स्यादिति वाच्यम्। केवलान्वयित्वग्राहक-मानान्तरादुपाधेर्विशिष्टाव्यापकत्वात्। न च स्वव्याघातकत्वेना-नुपाधौ पक्षेतरत्वेतिऽव्याप्तिः अनुकूलतर्काभावेन तस्य साध्या व्यापकत्वनिश्चयात्। न हि सहचारदर्शनव्यभिचारादर्शनमात्रात व्याप्तिग्रहः अप्रयोजकेऽपि तद्ग्रहप्रसङ्गात्। न चाप्रयोजकत्वादेव तद्गमकं नहि व्याप्तस्य पक्षधर्मत्वं प्रयोजकं नाम, सहचारदर्शनमात्रस्य सशायकत्वाच्च। तथापि व्यभिचारसंशयाधायकत्वेन सन्दिग्धोपाधिः स्यादिति चेत्। न। स्वव्याघातकत्वेन तस्य तत्र संशयानाधाय-कत्वात्। बाधोन्नीते च पक्षेतरत्वे साध्यव्यापकताग्राहकोऽनुकूल-तर्कोऽस्त्येव। अत एव पर्व्वतावयववृत्त्यन्यत्वादयोऽप्युपाधयोनिरस्ताः। धूमवत्त्वे साध्य आर्द्रेन्धनप्रभववह्नित्वस्य बहिरिन्द्रियप्रत्यक्षे चोद्भूत-रूपवत्वस्य व्यापकताग्राहकः प्रत्यक्षोऽवष्टतःमैत्रतनयश्यामत्वे साध्ये

शाकपाकजत्वस्य वैयर्थ्यापत्तेः कार्य्यकारणभाव एवं जन्यानित्यत्वे साध्ये भावत्वस्य व्यापकत्वग्राहको घटोन्मज्जनप्रसङ्गात् । एवमन्येषामपि तत्तदनुकूलतर्काद्व्यापकत्वग्रह इति ।

सम्प्रदायविदस्तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं व्यावर्त्तते स धर्मस्तत्र हेतावुपाधिः स च धर्मः कतमो भवति, यस्य व्यावृत्तिः साध्यसाधनसम्बन्धविरोधिनी, यथार्द्रेन्धनवत्वं वह्निमत्त्वे, व्यावर्त्तते हि तद्व्यावृत्त्या धूमवत्व तप्तायःपिण्डे, एव व्यावर्त्तते भावत्वव्यावृत्त्या प्रध्वंसे जन्यानित्यत्वसम्बन्ध इति पक्षधर्मताबलादनित्यत्वाभावः सिद्ध्यति । तथा वायावुद्भूतरूपवत्वं निवर्त्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्त्तयत् पक्षधर्मताबलेन प्रत्यक्षत्वाभावमादाय सिद्ध्यति । पक्षेतरस्तु नोपाधिः स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वादित्याहुः ।

स चायं निश्चित एव, क्वचित्सन्दिग्धोपाधिः, स च नैवमाकारोयमनुपाधिरस्ति न वेति तस्य शङ्कापिशाचीत्वेन उपपत्तिसमप्रपञ्चत्वात् । किन्तु साध्यव्यापकत्वे साधनाव्यापकत्वे चोभयत्र वा सन्देहात् । यथेश्वरानुमाने तुल्ययोगक्षेमत्वेन साधनस्य साध्यव्यापकत्वानिश्चयदशायां शरीरजन्यत्वं, तथा मैत्रतनयत्वेन श्यामत्वे साध्ये शाकपाकजत्वस्य साध्यव्यापकत्वानिश्चयदशायां शाकपाकजत्वमिति क्रमेणोदाहरणानि ।

अत्रोपाधित्वसन्देहो नोपाधिर्न्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोग इति केचित् ।

तन्न । व्यभिचारस्य हेत्वाभासतया तच्छङ्काधायकत्वेन सन्दि-

अयं प्रयत्नार्थः। प्रत्यक्षोपलम्भा[1]स्तावद्योग्यानुप-
लम्भानैकान्तिकवदस्यापि दोषत्वात्। स चायमुपाधिरनतिरिक्तो
हेत्वाभास इति व्यवस्थापितमधस्तादिति स्थिते किमयं स्वव्यति-
रेकद्वारा सत्प्रतिपक्षः साध्याव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायको
व्याप्तिविरहरूपत्वेनासिद्धो वा व्यभिचारोन्नायको वा। नाद्यः
सन्दिग्धोपाधेरदूषकत्वापातात् तद्व्यतिरेकस्य पक्षेऽसिद्धत्वात्।
बाधोन्नीतपक्षेतरत्वस्य व्यतिरेकेऽसाधारणतयाऽनुपाधित्वापत्तेश्च,
सत्प्रतिपक्षे सत्पक्षान्तरानुद्भावनात्, एकेनैव भूयसामपि प्रतिबन्धात्।
न द्वितीयः साध्यव्याप्यसाधनाभिमताव्यापकत्वेनोपाधेरेव साध्य-
व्यापकत्वसाधनात्। न तृतीयः तस्योपाधिकत्वज्ञानस्य व्याप्ति-
ज्ञानकारणत्वेन विघटकतया स्यात् तच्चान्यस्य साध्यव्यापकत्व-
साधनाव्यापकत्वज्ञानमन्यस्य व्याप्तिज्ञाने स्वतो न दूषणमित्यनेन
निरस्तमेव। न चतुर्थः साध्यव्याप्यव्यभिचारित्वेनोपाधेरेव साध्य-
व्यभिचारित्वानुमानप्रसङ्गात्। सत्यम्। पक्षे बाधकेन यावन्नोपाधेः
साध्यव्यापकत्वं निश्चीयते तावदुपाधित्वाभावेन दूषणत्वमेवास्य
नास्तीति न (स)दूषकताबीजचिन्ता। तन्निश्चये च साधनाभिमतस्य
साध्य(त्वा)व्याप्यत्वानिश्चयान्न तद्व्यभिचारित्वेन तदव्यापकत्वेन वोपाधेः
साध्यव्यभिचारित्वं तदव्यापकत्वं वाऽनुमीयते। तस्मात्साध्यव्यापक-
व्यभिचारात् तद्व्यभिचारोन्नयनद्वारा साध्यव्यापकव्याप्यत्वेन व्याप्ति-
विरहोन्नायकतया सोपाधेर्दूषकत्वमिति पितृचरणोन्नीतमार्गान्
गमनोन्मुखैरस्माभिरुक्तो विस्तरो नानवधेय इति।

(१) लस्य इति पु० २ पा०।

लब्धेरेव निरस्ताः । प्रमाणान्तरपरिदृष्टानामपि व्यापकानामुपाधित्वे वह्नेः सार्वत्रिकत्वप्रसङ्गः । अव्यापकानामपि नित्यानामुपाधित्वे वह्नेः सदाऽनुवृत्तिप्रसङ्गः । अनित्यास्त्रिविधाः । उभया[1] व्यभिचारिण अन्यतराव्यभिचारिण उभयव्यभिचारिणः । तत्र प्रथमद्वितीया[2] उपाधिलक्षणाभावादेव नोपाधयः । अन्यतराव्यभिचारिणश्च द्विविधाः । धूममात्राव्यभिचारिणो वह्निमात्रा[3] व्यभिचारिणश्च । तत्र पूर्वं पूर्ववत् । वह्नि-

उक्तरीत्या उपाधिशङ्कानिरासे प्रयत्नोपयोगार्थमाह । प्रमाणेति । व्यापकानामुपाधीनामुपाधित्वेन समव्याप्तोपाधिपक्षमाश्रित्य दूषणमाह । सार्वत्रिकत्वेति । विषमव्याप्तोपाधिपक्षे साधनव्यापकत्वं तेषामिति भावः । नित्यानां परमाण्वादीनामित्यर्थः । अत्रापि विषमव्याप्तोपाधिपक्षे साधनव्यापकत्वमेव दोषः सम्मत इत्यर्थः(?) । साध्यं साधनं चेत्युभयम् । यद्यप्युभयाव्यभिचार्यनित्यत्वं प्रमाणपरिदृष्टो नैयायिकानामप्रसिद्धः महानसादीनामुभयव्यभिचारित्वात् वह्निमत्त्वस्य चोपाधेर्नित्यत्वात् तथापि वह्निरेव वह्निव्यापकस्तथाभूतः प्रसिद्धः अभेदेपि व्याप्यव्यापकभावादिति भावः । तत्रेति । प्रथमे साधनव्यापकत्वात् द्वितीये साध्यव्यापकत्वादित्यर्थः । धूममात्रेति । मात्रशब्दोऽत्रसामान्यार्थः न तु व्यवच्छेदार्थः वह्निधूमयोरेव व्याप्त्यापत्तेः । पूर्ववदिति । साधनव्यापकत्वादित्यर्थः । व्याप्य

(१) उभयत्र २ पु० पा० । (२) प्रथमतृतीया इति २ पु० पा० ।
(३) इति तत्र पूर्वे लक्षणाभावादेव नोपाधयः । वह्निमात्र इति २ पु० पा० ।

मात्राव्यभिचारिणोपि द्विविधाः। व्याप्यमात्ररूपा उभयरूपाश्चेति।

पूर्ववदेव पूर्वं। उभयरूपास्तु सामग्रीतः, नापि परे विद्यन्ते। सा च न क्वचिदुपाधिः धूमस्य वह्निनेव तथापि स्वभावसम्बन्धात्। वह्निजननसामग्र्यां वह्ने-

मात्रेति। मात्रपदेन वह्निव्यापकत्वनिषेधः। तथा च साध्याव्याप कत्वमित्याह। पूर्व्व इति। उभयरूपा इति। साध्यव्याप्यत्वे सति साध्याव्यापका इत्यर्थः। सा चेति। यद्यपि सश्यामोमैत्रतनयत्वा दित्यत्र शाकपाकजत्वं श्यामसामग्र्येवोपाधिः तथापि यत्र साध्य-सामग्र्या सह साधनस्य व्याप्तिग्राहकमस्ति तत्र साधनव्यापकत्वात् सामग्री नोपाधिः. यत्र तु तन्नास्ति तत्र सामग्र्युपाधिरेव। न च तेनैव हेतुना शाकपाकजत्वमपि साध्य तत्र श्या त्वस्योपाधित्वात। उभयस्यापि साधने चार्थान्तर श्यामत्वमात्रे हि विप्रतिपत्तिः न तूभयत्र। ग्रन्थस्तु सामग्री क्वचिन्नोपाधिः यत्र साधनाव्यापिका अन्यत्र तूपाधिरेवेति योजनीयः। न चैव धूमादग्न्यनुमाने वह्निसामग्र्युपाधिः स्यात् तत्र वह्निनेव तत्सामग्र्यापि सह धूमस्यानौपाधिकत्व-निश्चये साधनव्यापकत्वनिश्चयात्। मैत्रतनयत्वं व्याप्यश्यामसामग्र्या-भावमित्यत्र च कार्य्यकारणभावादीनां व्याप्तिग्राहकाणामभावा-दित्याह। धूमस्येति। वह्निजननेति। यद्यपि वह्निजन्यं न वह्निद्व्यणुक वह्नित्वस्य परमाणावृत्त्याऽवयविमात्रवृत्तित्वात्। तथापि वह्निप्रत्य-क्षसाधने यदि वह्निसामग्र्युपाधिरुच्यते तदा वह्निरेवोपाधिः स्यात्

रप्यन्तर्भावाच्च । न च कृतकत्वानुष्णत्वयोः सम्बन्धे तेजोजातीयेतरत्ववदिहापि साध्यधर्मजातीयेतरत्वमुपाधिः । तस्य प्रमाणबाधैकमात्रनियतत्वात् ।

अत एवोपाधिमप्यपश्यन्तोविरोधिप्रमाणसदसद्भावनिश्चयव्यग्रतया मुहूर्तमनुमितौ विलम्बामहे । तदेव सर्वथोपाध्यनुपलम्भात्तदभावनिश्चयो यथा धूमसम्बन्धे तथाऽन्यत्रापि द्रष्टव्यः । तर्कश्च शङ्कानिराकरणपटीयान्विजयते ।

साध्य च नोपाधिः व्यभिचारसाधने साध्यावैशिष्ट्यप्रसङ्गादनुमानमात्रोच्छेदाच्चेति भावः। ननु वह्निरनुष्णः कृतकत्वादित्यत्र बाधोन्नीत वह्नीतरत्ववत्पर्व्वेतेतरत्वमुपाधिः स्यादित्यत आह । न चेति । तत्र वह्नावुपजीव्यप्रत्यक्षेण साध्याभावप्रमया साधनसाध्यव्यभिचारनिश्चयात व्यभिचारे चाऽवश्यमुपाधिसम्भवादन्यस्य चोपाधेरसम्भवात पक्षेतरत्वमुपाधिः, प्रकृते च न तथा अनुमानमात्रोच्छेदप्रसङ्गादित्यर्थः । अत एवेति । यद्यपि बाधितत्वज्ञानाभावोऽनुमितिप्रयोजको न त्वबाधितत्वज्ञानमितिविरोधिप्रमाणाभावनिश्चयोऽप्रयोजकः तथापि विरोधिप्रमाणसंशयस्यानुमितिप्रतिबन्धकतया तदभावस्याप्यपेक्षणीयत्वमस्त्येवेति भावः । नन्वेतावता प्रत्यक्षोपाध्यभावनिश्चयेप्यतीन्द्रियतदभावः कथं निश्चेयः कथं वा साध्यव्यापकोऽयं साधनव्यापको न वेति संशयस्य देशान्तरकालान्तरयोर्व्यभिचारसंशयस्य वा निवृत्तिरित्यत आह । तर्कश्चेति । यथा चैतत्तथाऽनुपदमेव

ननु प्रमाणसिद्धं वस्तुनिस्वभावोऽवलम्बनं, न तु स्वभावावलम्बनेनैव वस्तुव्यवस्थेत्याशयवान्पृच्छति। केन पुनरिति।

प्रथमदर्शनेनैव वह्निधूमयोरव्यभिचारग्रहणं, द्वितीयादिभिस्तु शङ्कामात्रमपनीयत इति केषांचिन्मतमपनयन्नेव प्रकृतं प्रपञ्चयति। यदा तावदिति।

अत्र चैवं परमार्थः। योयमुपाधिमादाय येन सह सम्बध्यते स निरुपाध्यवस्थायां तस्यागमको यथा वह्निर्धूमस्य। सोपाध्यवस्थायामपि उपाधेः, केवलस्यैव सामर्थ्ये स एव गमको न तूपहितः। यथा ऽऽहारपरिणतिभेदस्यैव गमकत्वे मैत्रतनयत्वं, यत्र तूपाधिः

वक्ष्यामः। ननु स्वाभाविके सम्बन्धे कुतः प्रमाणमित्यत आह। नन्विति। ननु प्रमाणाभिधानमुपक्रम्य संशयाभिधानमर्थान्तरमित्यत आह। प्रथमदर्शनेति। प्रथमदर्शनेनैव व्याप्तिनिश्चयेऽग्रे ततः संशयो न स्यादिति संशयान्यथानुपपत्त्या न तथेति भावः। यथा वह्निरिति। आर्द्रेन्धनप्रभवत्वमुपाधिमादाय वह्निर्धूमेन सह व्याप्त इति तदभावे अयं धूमवान् वह्निमत्त्वादित्यत्र वह्निर्धूमस्य न गमक इत्यर्थः। यथा आहारेति। पुरुषश्यामत्वे शाकपाकजत्वस्यैव गमकत्वं, न तु तद्विशिष्टमैत्रतनयत्वस्य, व्यर्थविशेषणत्वादित्यर्थः। यत्र त्विति। आर्द्रेन्धनप्रभवत्वमात्रस्य गुणादावपि सत्वात्तन्मात्रं

केवलोऽव्यभिचारी तच्च सोपाधिरपि गमक एव। यथार्द्रे-न्धनवान् वह्निर्धूमस्येति। तत्कस्य हेतोः। विशिष्टस्य निरुपाधित्वादिति। भूयोदर्शनमिति। ... तज्ज-नितसंस्कारसहितमित्यर्थः।

अग्रे चैतदेव स्फुटीकृतमित्यविरोधः। ...भेद-त्ववदिति। ... यथा मणयो विशेषैस्तत्तद्व-

न धूमगमकमित्युपाधिरूपविशिष्टोऽप्यार्द्रेन्धनप्रभववह्निमत्त्वादिर्गमक एवेत्यर्थः। ननु भूयोदर्शनं यदि व्याप्तिग्राहकं तदाऽग्रे संस्कारस्य तद्ग्राहकत्वाभिधानं विरुद्धमित्यत आह। तज्जनितेति। यथेति। विशेषोऽवान्तरजात्यादिभिर्मणेः पद्मरागादिव्यवहारविषयो धारकस्य शुभाशुभजनकश्चानुमीयत इत्यर्थः।

ननु भूयांसि दर्शनानि प्रत्येकं व्याप्तिं गमयेयुः मिलितानि वा। नाद्यः प्रत्येकदर्शने सत्यपि तत्र संशयात्। नान्त्यः आशु-विनाशिनां क्रमभाविनां यौगपद्यासम्भवात्। यथा प्रत्यभिज्ञायां संस्कारसहितमिन्द्रियं हेतुः तथा तावद्दर्शनजसंस्कारसहितं तत्त्वेऽपीति चेन्न। तत्र संस्कारेन्द्रिययोः समानविषयत्वात् तथैवौचित्यात्। अत्र च सहचारविषयकः संस्कारो व्याप्तिविषयकमिन्द्रियमिति भिन्नविषयकत्वात्। अपि च भूयोदर्शनं न भूयांसि दर्शनानि एकस्यैव धारावाहिकेन तद्ग्रहप्रसङ्गात् त्रिचतुरादिरूपत्वेनाननु-गमाच्च। नापि भूयःसु स्थानेषु दर्शनं एकाश्रयाश्रितरूपरसयो-स्तदभावात्। नापि भूयसां दर्शनं गोत्वद्रव्यत्वयोस्तदभावात्।

किञ्च शतशः सहचरितयोरपि पार्थिवत्वलौहलेख्यत्वयोर्व्याप्त्य-
ग्रहात् व्यभिचारात्। न च तत्तत्समानं तर्कसहकृतस्य तद्ग्राहकत्वे
सहचारदर्शनादिरेव तर्कसहकृतो व्याप्तिग्राहकोऽस्त्वावश्यकत्वात् किं
तत्र भूयोदर्शनेन। न चैवमस्त्विति वाच्यम्। तर्कस्यापि व्याप्तिमूल-
कत्वात्। तत्र तर्कं विना यदि तन्निश्चयस्तदा व्यभिचारान्न सोऽपि
तद्धेतुः स्यादिति। अथ तर्कान्तरात्तन्निश्चयस्तदाऽनवस्था। न
चानादिसिद्धव्याप्तिका एव केचित्तर्का इति वाच्यम्। तत्र प्रमाणानु-
योगे अनुमान एव पर्य्यवसानात्। न च व्याप्तिग्रहान्यथानुपपत्त्या
तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानं अनुपपत्तेरनुमानत्वात्। अथ
सर्व्वोपसंहारेण सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिनिश्चयः सामान्य-
रूपत्वं च न सकृद्दर्शनगम्यमिति तद्भूयोदर्शनापेक्षेति चेत्। न।
सकृद्दर्शनगम्यत्वादिभिस्तदनभ्युपगमात्। अभ्युपगमेऽपि वस्तुसत्
सामान्यं प्रत्यासत्तिः न तु सामान्यरूपतया ज्ञातं प्रत्यासत्त्यन्तरे
तथाऽकल्पनात्। न च काकतालीयतादिशङ्कानिरासार्थे द्विती-
यादिदर्शनापेक्षा, तत्सत्त्वेऽपि शङ्कातादवस्थ्यात्। अथानौपाधि
कत्वज्ञानस्य व्याप्तिज्ञानहेतुतया साध्यसहचरितानामनुपाधित्व
निश्चयस्य साध्यव्यापकसाधनव्यापकत्वनिश्चयसाधनाव्यापकसाध्या
व्यापकत्वनिश्चयसाध्यत्वात् तस्य च भूयोदर्शनसाध्यत्वात्तदपेक्षेति
चेत्। न। योग्यानां तेषां ततोऽनुपाधित्वनिश्चयेऽप्ययोग्योपाधि-
संशयाधीनव्यभिचारशङ्कातादवस्थ्यात्। अनुमानात्तदनुपाधित्व
निश्चये अनवस्थापत्तेः। तस्मात् परिशेषेण सकृद्दर्शनगम्यैव व्याप्तिः
उपाध्यभावस्य व्याप्तित्वात्। तस्य च केवलाधिकरणरूपतया

चक्षुरादिना प्रथमदर्शनगम्यत्वात् । न चाद्ये व्याप्तिसंशयानुपपत्तिः । सन्नप्युपाधिरुपाधित्वेन मया न ज्ञात इति संशयात् विद्यमानः ज्ञानप्रामाण्यसंशयाद्वा तदुपपत्तेः । न ह्येतत्संशयानुरोधात् पूर्व्वव्याप्तिनिश्चयसामग्र्यामपि तन्निश्चय इति युज्यते घटज्ञानसामग्र्यामपि तथा कल्पनापत्तेः । न चैवं प्रथमदर्शनानन्तरमेवानुमितिः स्यात् । उपाधिस्मरणसहकृतस्य योग्योपाध्यनुपलम्भस्यानुमितावुपाध्यभावव्यवहारे च कर्त्तव्ये व्याप्तिज्ञानसहकारित्वात् । मैवम् । उपाध्यभावो हि नानोपाधिकत्वं यत्किंचित्साध्यव्यापकसाधनाव्यापकधर्म्मशून्यत्वस्य धूमेऽप्यभावात् व्यभिचारिण्यपि गतत्वाच्च । किन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमित्युक्तं, तच्च न सकृद्दर्शनगम्यम्, अपि च वस्तुगत्या या व्याप्तिस्तज्ज्ञानं नानुमितिहेतुरतिप्रसङ्गात् । किन्तु व्याप्तित्वेन । न चोपाधेरज्ञाने तथात्वेन ज्ञानं सम्भवति विशेषणज्ञानं विना विशिष्टज्ञानानुत्पादात् । किंच प्रतियोगिज्ञानस्याभावव्यवहारहेतुत्वेऽप्युपाधिज्ञानं विनापि तदभावज्ञानादनुमितिः प्रथमदर्शनानुपदं स्यादेव, न ह्युपाध्यभावव्यवहारोऽनुमितिहेतुरपि तूपाध्यभावज्ञानं तच्च तदानीं जातमेव, तथापि सकृद्दर्शनस्येव भूयोदर्शनस्यापि संशायकत्वात्तर्कदोषाच्च कथं व्याप्तिग्रहः ।

अत्रास्मत्पितृचरणाः व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकं, न च सर्वेषां व्यभिचारज्ञानविरहित्वमशक्यं ज्ञातुं स्वीयव्यभिचाराज्ञानं च व्यभिचारिसाधारणमिति वाच्यम् । न हि व्यभिचारज्ञानाभावो ज्ञात उपयुज्यते अपि तु स्वरूपसन्-

वेन्द्रियसहकारी। व्यभिचारज्ञानं च तन्निश्चयस्तच्छङ्का च। तत्र-शङ्का क्वचिदुपाधिसन्देहात् क्वचिद्विशेषादर्शनसहितसाधारणधर्म्म-दर्शनात्। तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित स्वतःसिद्ध एवेति न तर्कस्य व्याप्तिग्रहमूलकत्वेऽनवस्था, यावदाशङ्कन्तर्कानुसर-णात्, यत्र व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्ति-ग्रहः, तथाहि--धूमो यदि वह्निसमवहितकारणाजन्यत्वे सति वह्नि-समहिताजन्यः स्यादजन्यः स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति क्वचिद्वह्निं विनापि भविष्यति तदकारणक एवोत्पन्नः स्यादित्याशङ्का स्यात्तत्र सर्व्वत्र स्वक्रियाव्याघातः, यदि गृहीतान्वयव्यतिरेकं हेतु विना कार्य्योत्पत्तिं शङ्कत तदा धूमार्थं कथ स्वयं वह्निमुपाददीत। परप्रतिपत्त्यर्थं कथ शब्दं प्रयुञ्जीत। न हि यद्व्यतिरेकेण यस्योत्पत्तिराशङ्क्यते नियमतस्तदर्थं तदुपादीयत इति सम्भवति। न च केवलान्वयिनि व्यभिचारशङ्काया असम्भवः। तत्रापि समानाधिकरणात्यन्ताभावप्रतियोगिसाध्यं न वेति तस्याः सम्भवात् तस्या व्यापकतागोचरत्वेऽपि समानसंवित्संवेद्यतया व्याप्यगोचरत्वात्। न च व्याघातस्य विरोधस्वरूपतया तस्य सहानवस्थाननियमरूपतया नियमस्य च व्याप्तिरूपतया अनवस्था, न हि विरोधिप्रतिसन्धानं तादृशशङ्कानिवर्त्तकमाचक्ष्महे किन्तु स्वक्रियैव तादृशशङ्कोत्पत्ति-प्रतिबन्धक इति क्रमः।

अतएव 'व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम। व्याघातावधिराशङ्का तर्कःशङ्कावधिः कुतः'—

इति खण्डनमपास्तम। स्वक्रियाया एव तादृशशङ्काप्रति-

हारविषयो भवति धारयितुश्च तत्तत्फलभेदसम्पादक-श्चोन्नीयते तेते सूक्ष्मा विशेषाः परीक्षकैरुन्नीयन्ते भूयो-भिर्दर्शनैस्तथात्रापीति ।

तथाहि प्रथमतस्तावद्भूयोदर्शनं काकतालीयन्याय-

वन्धकतया शङ्काया व्याघातानाश्रयत्वात् एतादृशतर्कावतारश्च न भूयोदर्शनं विनेति भूयोदर्शनादरो न तु स्वत एव प्रयोजकः । अतएव वक्ष्यति । न वारसङ्ख्यानियम इति । यावता दर्शनेन तर्काभावस्तावद्विवक्षितत्वादिति भावः । भूयोदर्शनाहित-संस्कारस्य मनःसहकारी तेन चक्षुरादिव्यापारं विनापि सहचार-ज्ञानवतो व्याप्तिग्रहः । न चैवं शाब्दादेरिव संस्कारस्य मानान्तर-तापत्तिः । तर्कावतारे तस्य प्रयोजकत्वात् । तस्य चाप्रमात्वादतो निद्रादिवदप्रमाजनकत्वान्न मानान्तरत्वम् । ननु वस्तुगत्या सन्नपि तर्को न व्याप्तिग्राहकः तदभावेऽपि व्यभिचारिणि व्याप्तिग्रहात् । नापि तर्कत्वेन ज्ञातः व्यभिचारिसाधारण्येन संशायकत्वादिति । सहचारदर्शनव्यभिचारादर्शनवत्तर्कत्वेन ज्ञानं व्यभिचारिसाधारण-मिति न तावता व्याप्तिनिश्चय इति चेन्न । स्वरूपसत एव व्याप्तिग्राहकत्वात् न हि इयं व्याप्तिसामग्री, अपि तु तज्ज्ञान-सामग्री, तथा च सत्तर्कात् व्याप्तिप्रमा, तदभावादप्रमेति न काचित् क्षतिः । यथा विशेषदर्शनस्य प्रमात्वाप्रमात्वाभ्यां विशेषज्ञानस्य तथात्वमिति । येषां च तर्कं विनैव सहचार दर्शनादेव व्याप्तिग्रहः तेषां पक्षेतरत्वमुपाधिः स्यादित्युक्तम् ।

व्युदासाय। ततः सातत्योद्गत्यादि विशेषावसायाय। तत उपाधिशङ्कानिरासाय। तत्र च नवारसङ्ख्यानियमाभ्युपयोगः। मृदुमध्यातिमात्रबुद्धिभेदेन पुंसां विचित्रशक्तित्वात्। न चैवं लक्षणशास्त्रवैयर्थ्यं। अनियतवारविशिष्टतत्वसाक्षात्कारावधि योगाभ्यासोपदेशवदिहापि निरुपाधिसम्बन्धबोधावधिनियमात्। कार्यकारणभावावगमेऽप्ययमेवमार्गो न तु पञ्चप्रत्यक्षानुपलम्भाः। अन्यतोऽनागतस्य तत्राऽसतस्तदनन्तर-

इयं च प्रत्यक्षव्याप्तिग्रहसामग्री तदभावेपि शब्दानुमानाभ्यां व्याप्तिग्रहादिति सङ्क्षेपः। तत इति। धूममात्रस्य वह्निव्यभिचारित्वाद्यद्विशेषणविशिष्टस्य तदव्यभिचारित्वं तन्निश्चयार्थमित्यर्थः। तत इति। व्यभिचारोन्नेयोपाधिस्तद्दर्शनेनाभावनिश्चय इत्यर्थः। न चैवमिति। पुरुषशक्तिवशादेव तदुपपत्तेरित्यर्थः। अनियतवारेति। यथा योगाभ्यासे न वारसङ्ख्यानियमः किन्तु यावताभ्यासेन साक्षात्कारोभवति तावत् विवक्षितः तथा यावता दर्शनेन यस्योपाधिव्यतिरेकनिश्चयः तावदभिप्रेतमित्यर्थः।

पञ्चप्रत्यक्षेति। प्रथमं धूमानुपलम्भः ततो वह्न्युपलम्भः ततो धूमोपलम्भः ततो वह्न्यनुपलम्भः ततो धूमोपलम्भः। तदेवमुपलम्भद्वयमनुपलम्भत्रयं चेति पञ्चप्रत्यक्षानुपलम्भा बौद्धोक्ता न कार्य्यकारणभावनियमहेतव इत्यर्थः। अत्र हेतुमाह। अन्यत इति।

मुपलम्भेपि ततोन्यस्मादनुत्पत्तेः भावमात्रेण निश्चेतुमशक्यत्वात्। काकतालीयन्यायेनापि सम्भवात्। भूयः प्रवृत्तौ तु यदि न व्यभिचारोपलम्भः उपाध्युपलम्भोपि न स्यात्। द्वयापगमे तु तन्नियतः सम्बन्ध इति।

स्यादेतत्। धूमादीनां मैत्रतनयत्वादीनां च भूयोदर्शनत्वाविशेषेऽपि कुतोविशेषादेकस्य गमकत्वमपरस्य नेत्यत आह। न चेति। [११४, १२]

यत्त्वेोक्तं यथाद्यनार्द्रेन्धने वह्नौ न धूम इति वह्नेस्तत्सम्बन्धे तथाविधमिन्धनमुपाधिः तथा यदि [1]मैत्राज्जातस्यापि कस्यचिद्विवक्षिताहारपरिणतिविरहेण श्यामतोपालप्स्यत स उपाधिर्निरचेष्यत। न त्वेतदस्ति।

भूयः प्रवृत्ताविति। पार्थिवत्वलौहलेख्यत्वयोरिव भूयो दर्शनेपि व्यभिचारोपलम्भो यदि तदा तद्वदेवोपाध्युपलम्भोपि स्यादिति योग्यानुपलम्भाद्भयाभावोनिश्चीयत इत्यर्थः। आपादनसम्भवार्थमाह। स्यादेतदिति। यदुक्तमिति। वह्निना धूमे साध्ये यथोपाधिव्यतिरेकेण वह्नौ सत्यपि धूमव्यतिरेकोपलम्भादुपाधिनिश्चयो न तथा स श्यामो मैत्री तनयत्वादित्यत्र शाकपाकजत्वस्योपाधेर्व्यतिरेकेण साध्यस्य श्यामत्वस्य व्यतिरेक उपलभ्यते येन येन शाकपाकजत्वस्योपाधित्वनिश्चयस्तथात्वे वा व्यभिचारादेव हेतोरगमकत्वे सिद्ध

(१) मैत्रतनयस्यापि इति १ पु० पा०।

तथा सत्यपि चोपाधिवादो व्यर्थः व्यभिचारादेव मैत्रतनयस्याऽहेतुत्वात् इति।

तदिदमनवधारितोपाधिलक्षणस्य साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं न किंचिदेव।

तथा हि। नोपहितस्य निश्चय एव साध्यव्यभिचार उपाधेर्लक्षणं, किं नाम? साधनाऽव्यापकत्वे सति साध्यव्यापकत्वं, तच्च साध्याभिमतधूमश्यामत्वं प्रति व्यापकत्वमार्द्रेन्धनान्नपानपरिणतिभेदयोरविशिष्टं, अविशिष्टं च साधनाभिमतदहनमैत्रतनयत्वे प्रति तयोरव्यापकत्वम्। इयाँस्तु विशेषः दहनधूमेनैवार्द्रेन्धनेनापि साक्षादेव विनाभाव उपलभ्यते, मैत्रतनयत्वस्य तु श्यामत्वेनैवान्नपानपरिणामेनाप्युपाधेरुन्नीयत इति।

ननु वज्रे लोहलेख्यत्वं प्रति पार्थिवत्वहेतोः क

किमुपाध्यनुसरणेनेत्यर्थः। तदेतद्दूषयति। तदिदमिति। किन्नामेति। नैयकाच्छाकपाकजत्वस्य श्यामत्वं प्रति निश्चितव्यापकत्वस्य शब्दादिना साधनाव्यापकत्वे निश्चिते तदुपाधित्वनिश्चयादेव तद्विरहेण श्यामत्वविरहवद्धेतुसत्त्वेऽपि तद्विरह उन्नीयत इत्यर्थः। नन्विति। वज्रे लोहलेख्य पार्थिवत्वादिह क उपाधिरित्यर्थः। प्रशिथिलेति। प्रशिथिलत्वनिविडत्वे संयोगत्वावान्तरजातिभेदौ।

उपाधि - - - तर्हि तन्निवृत्तौ पवेरिव स्फटिकादावपि लोहलेख्यत्वनिवृत्तिप्रसंगः न खलु निबिडावयवत्वेनो-भयोः कश्चिद्विशेषः। ननिबिडावयवत्वेऽपि मृदादिभ्यः स्फटिकस्य प्रशिथिलावयवत्वादेव। न ह्यङ्ग मेदिनी निबिडेति न प्रशिथिलावयवा। इयांस्तु विशेषः। यथा-यथा शैथिल्यापकर्षस्तथा लेखितुः प्रयत्नप्रकर्षः। यदि तु शैथिल्यमप्रयोजकं मृत्काष्ठपाषाणादिषु प्रयत्नप्रक-र्षोऽपि [illegible]। पार्थिवत्वस्य सर्वत्राविशेषात्। स्फटिके कथमेषा प्रतिपत्तिरिति चेत्। लोहलेख्यत्वादेवा-लोहलेख्यत्वप्रशिथिलावयवत्वयोः समव्याप्तिकत्वादेव। अत एवानयोरेकतरप्रवृत्तिनिवृत्त्योरेवान्यतरप्रवृत्ति-निवृत्ती, न तु पार्थिवत्वप्रवृत्तिनिवृत्त्योरेव लोहलेख्य-त्वप्रवृत्तिनिवृत्ती, वज्रेऽदर्शनात्। जलादौ दर्शनाच्च। वह्नावनुष्णत्वसाधनस्य तु कृतकत्वस्य तज्जातीयेतरत्व-

तत्र बाधोन्नीतमहीरकत्वमुपाधिरिति सम्प्रदायविदः। तर्हीति। तथा च साध्याव्यापकत्वादिदमनुपाधिरित्यर्थः। इयांस्त्विति। यथा यथा दृढत्वं तथा तथा पाटने प्रयत्नोत्कर्ष इत्यर्थः। एवेति। शिथिलावयवत्वप्रतीतिरित्यर्थः। वह्नावनुष्णत्वेति।

लक्षणमुपाधिः स च बाधैकनियतविषय इति नातिप्रसङ्ग इत्युक्तम्।

तदेतत्सर्वं हृदि निधायाह। इत्यादय इति। [१११।१५]

यद्यपि द्वितीयलिङ्गदर्शनस्य स्मृत्या सह विनश्यदवस्थस्यैव परामर्शजनकत्वं क्वचित्, तथापि यत्र दृष्टमात्र एव वह्निनिवृत्तौ निवृत्तो धूमः कालान्तरे जिज्ञासावशात् परामृश्यते तत्र द्वयोरपि लिङ्गदर्शनयोरतीतत्वमित्याशयवतोक्तं। यद्यपीति। [११४।१८]

येन (च) परामर्शो नेष्यते तेन वाक्यस्य चतुर्थोवयव

तर्ह्यन्यत्रापि पक्षेतरत्वमुपाधिः स्यादित्यत आह। स चेति। अस्यार्थस्य टीकाकृदभिमतत्वमाह। तदेतदिति। तथापीति। तथा च विशेषस्य धूमस्यासन्निकर्षान्न तदा प्रत्यक्षपरामर्शः स्यादित्यर्थः। परामृश्यते– परामर्शविषयो भवतीत्यर्थः। स च व्याप्तिस्मृतिसहितेन मनसा जन्यत इति भावः। स्वसाध्याविनाभूतमिति टीका। यद्यपि लिङ्गं स्वसाध्याविनाभूतमेव भवति तथापि स्वसाध्याविनाभूतत्वेन प्रकारेण पक्षस्य ज्ञानं वह्निव्याप्यधूमवानयमित्येवं रूपमित्यर्थः। ननु तथाभूतलिङ्गगोचरत्वमुपनयस्याप्रकृतं कुत उच्यत इत्यत आह। येन चेति। हेतुवाक्यस्य स्वार्थरूपोपस्थापकत्वादादिवाक्यस्यासिद्धार्थत्वेनोपपत्त्यनाक्षेपकत्वात् परार्थानुमाने उपनयस्य पक्षधर्मताप्रतिपादनमेव व्यापारः स्वार्थानुमाने

उपनयोपि नैषितव्यः। पक्षधर्मताप्रतिपादनेन तस्योपयोगः, परार्थानुमाने तु सा द्वितीयलिंगदर्शनादेवावगतेति किं परामर्शेनेति चेत्। न। पक्षधर्मता हि व्याप्त्या सह प्रतिसंहितानुमानोपयोगिनी तादृशी चोपनयेन प्रदर्श्यते, न तु द्वितीयलिंगदर्शनेन। तस्य तु व्याप्त्यनुसंधानरहितं पक्षधर्मतामात्रमेव गोचरः। न च तदनुमानोपयोगि। तस्मादुपनयार्थो न द्वितीयलिङ्गदर्शननिरस्तः। ततः स्वार्थानुमाने यद्यस्ति तस्योपयोगः नूनं परामर्शोपि तृतीयः स्वीकर्त्तव्यः। नास्ति चेत्परार्थानुमानेऽपि लिङ्गपरामर्शकार्थमुपनयोऽपि नादरणीयः तुल्यविषयत्वादित्याशयेन सङ्कलव्यानयोः समानविषयत्वमाह। सम्बन्धेति। ११।१८

ननु व्यापारानुबन्धितया विषयत्वं विषयत्वे च व्यापारानुबन्ध इति परस्पराश्रयत्वम्। अथ व्यापारा-

---

तु द्वितीयलिङ्गदर्शनादेव तल्लाभान्न परामर्शोपयोग इत्यत आह। पक्षधर्मतेति। यो धूमवान्सोऽग्निमानिति केवलव्याप्तिज्ञानादनुत्पत्तेरनुमितेरित्याह। पक्षधर्मताहीति। उपनयार्थ इति। व्याप्तिविशिष्टस्य पक्षधर्मत्वमित्यर्थः। ननु नातिप्रसङ्गः लिङ्गिविषयप्रतिपत्तिजनकत्वाल्लिङ्गज्ञानं भवति लिङ्गविषयमित्यत एव तन्निराकरणादित्यत आह। ननु व्यापारेति। लिङ्गज्ञानस्य लिङ्गि-

नुबन्धितयैव विषयत्वं ! तथाप्यसम्बन्धत्वाविशेषात्कथं तस्यैव व्यापारानुबन्धित्वमित्याशङ्क्य परिहरति। न चाति प्रसंग इति। १२०।१०

न धूमज्ञानस्याग्निः स्वतंत्रस्य व्यापारविषयोयेनासम्बन्धत्वाविशेषादतिप्रसङ्गः स्यात् किंतु ज्ञेयविशेषणस्य ! तस्य च ज्ञायमानस्य धूमस्याग्निना सह नियामकः स्वभावसम्बन्ध एवातो नातिप्रसङ्ग इत्यर्थः।

विषयत्वे तेन लिङ्गविषय प्रतिपत्तिर्जन्येत लिङ्गिविषयप्रतिपत्तिजनकत्वेन तस्या लिङ्गिविषयत्वमित्यन्योन्याश्रयः। यदि अतद्विषयप्रतिपत्तिजनकत्वमेव तद्विषयत्वमितिनान्योन्याश्रय तर्हि ज्ञानजननात् प्रागविषयत्वमेव तस्येत्यविषयज्ञानजनने ऽतिप्रसङ्ग इत्यर्थः।

ननु यदि स्वाभाविकसम्बन्धशालिनो लिङ्गस्य लिङ्गिज्ञानजनकत्व तदा प्रमेयत्वादिज्ञानजनकत्वमपि तस्य स्यात् तेन प्रतिबद्धत्वादित्यत आह। धूमज्ञानस्येति। यद्यपि प्रमेयत्वादिना न लिङ्गम्प्रतिबद्धं तथापि यद्व्याप्यत्वेन लिङ्गम्परामृश्यते तद्विषयामेवानुमितिं जनयति धूमस्तु वह्निविशेषणत्वेन परामृष्टो न तु प्रमेयत्वविशेषणत्वेनातो वह्निमेवानुमापयतीत्यर्थः। यद्वा स्वतन्त्रस्य वह्निविषयकस्येत्यर्थः। किन्त्विति। ज्ञेयोऽनुमेयो वह्निर्विषयो यस्य वह्निव्याप्यधूमवानिति परामर्शस्य वह्निविषयस्यैव ज्ञानजनकत्वं अन्यथा विशेषेऽपि वह्निविशेषणतया परामृश्यत इत्यत्र स्वाभाविकः

पूर्वं लक्ष्यपदार्थप्रश्नावसरे अनुमीयतेऽनेनेतिकरणार्थ इत्युत्तरं दत्तम्। इदानीमनुमितिः कस्यांचिदवस्थायामनुमानं प्रमाणं भवन्नेति जिज्ञासाप्रश्ने भावः करणं चेत्युत्तरमतो न विरोधोऽथतः पौनरुक्त्यं वा। अतएवोक्ताक्रदपि व्यापारत्वेनाप्रामाण्यं पूर्वपक्षयित्वा फलान्तरहेतुत्वेन प्रामाण्यं समर्थयतिस्म।

इह यद्यपि विज्ञानप्रमाणयोरन्यतराधिकारेण

सम्बन्ध एव नियामक इत्यर्थः। ननु भावः कारणं नेत्युत्तरं करणं: पुनरुक्त एवांश च पूर्वव्युत्पादितकरणार्थत्वविरोध इत्यत आह। पूर्वमिति। करणव्युत्पत्तिमभ्युपगम्यैवानुमितिः करणं न वेति जिज्ञासायामेतदुक्तमिति नोक्तदोष इत्यर्थः। व्यापारत्वेनेति। फलत्वेन प्रमायां स कारणमित्यर्थः। प्रामाण्यं प्रमाकरणत्वमित्यर्थः। समर्थयतिस्म— न द्रव्यादीनामेव कारणत्वमित्यादिनेति शेषः। अतत्पूर्व्वकत्वादिति टीका। अनुमितेर्न प्रत्यक्षद्वयपूर्वकत्वमपि त्वनुमितिहेतुपरामर्शमित्यर्थः। सिद्धस्य फलभावनायामिति टीका। व्यापारत्वेन साध्यतया निमित्ततया निमित्तत्वाभावेऽपि सिद्धत्वदशायां फलस्य स्वर्गस्य या भावनाप्राप्तिरुत्पत्तिस्तत्र निमित्तत्वमित्यर्थः। एतत्त्रयमिति टीका। एतत्पूर्व्वकमित्यत्र तच्छब्देन व्याप्तिज्ञानं लिङ्गज्ञानं व्याप्तिस्मृतिश्चेति त्रयं परामृश्यते। तत्रानुमितावप्यस्त्येवेत्यतत्पूर्वकत्वादिति युक्तं तत्परिहृतमित्यर्थः। प्रधानेति। परामर्शः साक्षादेवानुमितिकारणं व्याप्तिस्मृत्यादिस्तु

संस्कारनिर्णययोर्व्युदासः विज्ञानाधिकारे हि तत्पूर्वक-
मनुभवकारणमनुमानमिति सूत्रसम्बन्धः। न चैवंभूतौ
संस्कारनिर्णयविशेषौ। तयोरनुभवं प्रत्यहेतुत्वात्।
प्रमाणाधिकारेपि फलतः स एवार्थः तत्पूर्वकं प्रमा-
करणमनुमानमितिसूत्रसम्बन्धात्। तथापि विवक्षा-
भेदाद्विकल्पेनोभयत्र सम्बध्यत इति विवक्षितत्वैकैक-
निष्ठतयैकैकं दर्शितमिति तथैव व्याख्यातवान्। वस्तु-
तस्तूभयमुभयत्र सम्बद्धमितिनिगर्वः। विपक्षावृत्ति-
रितिवार्त्तिके बहुव्रीहिसमासस्थितोविशेषणतया व्यति-
रेको निष्कृष्य प्रधानतया तत्पुरुषपदेन प्रदर्शितो
विपक्षावृत्तिर्व्यतिरेक इति।

तद्वारेत्यर्थः। विज्ञानाधिकार इति। ज्ञानपदमिन्द्रियसन्निकर्ष-
जन्यत्वेनानुभवपरं प्रत्यक्षसूत्र इत्यत्रापि यत इत्याध्याहारेणा-
नुभवकरणत्वलाभ इति भावः। विकल्पेनेति। विज्ञानाधिकारेण
प्रमाणाधिकारेण चोभयनिराम इत्यर्थः। एकैकमिति। एकैकनि-
रासार्थमेकैकं दर्शितं वार्त्तिककृतेति शेषः। ननु वार्त्तिककृता
विपक्षावृत्तिरिति हेतुविशेषणमुक्तं, तद्विरुद्धं विपक्षावृत्तिर्व्यतिरेक
इति व्याख्यानं कुत इत्यत आह। विपक्षावृत्तिरिति। अन्य-
पदार्थविशेषणीभूतनञर्थस्य व्याख्यानान्न विरोध इत्यर्थः। ननु
व्यतिरेकाभावेन विपक्षसत्वमेवोक्तं स्यादभावाभावस्य भावत्वादत
आह। व्यतिरेकेति। अभावनिरूपणे अधिकरणज्ञानस्य हेतुत्वा-

अतो न वार्त्तिके हेतुसामानाधिकरण्यविरोधः। व्यतिरेकाभावं ११४।२२ व्यतिरेकनिरूपणाभावमित्यर्थः। इष्टावस्तुनो विधिनिषेधव्यवहारविषयत्वं लौकिकसमीहानुरोधाद्वा शुक्तिरजतवद्रज्जुसर्पवच्च प्रमाणानुरोधाद्वा, गन्धम्प्रति पृथिवीवदुदकवद्वा, वचनमानानुरोधाद्वा प्रधानवत् शशविषाणवच्च, मूढप्रश्नानुरोधाद्वा धर्मान्तरं प्रति पूर्ववदेव स्ववचनविरोधभयादेति।

तत्र प्रथमस्तावदवस्तुन्यसंभवी लौकिकप्रवृत्तिनिवृत्त्योर्वस्तुमात्रविषयत्वात् द्वितीयादिष्वेव च परंपरया

दित्यर्थः। एव चायं मङ्गामभावो निरूप्यत इत्यत्र निरूपणकारणदर्शनं मङ्गच्छत इति भावः। समीहाप्रवृत्तिर्निवृत्तिश्चात्र निवृत्तावुदाहरणं रज्जुसर्पवदिति। उदकवदिति गन्धव्यतिरेकोदाहरणम्। मूढप्रश्नेति। यदि शशविषाणे कस्यापि धर्मस्य कूर्म्मरोमादिरूपस्य वृत्तिं पृच्छति तदा तदनुरोधात् वृत्तिव्यवहारोऽथावृत्तिं पृच्छति तदा तदनुरोधान्न वृत्तिव्यवहार इत्यर्थः। पूर्व्ववदिति। शशविषाणवदेवेत्यर्थः। स्ववचनेति। अलीके हि हेतोर्वृत्तिरवृत्तिर्व्वा प्रकारान्तराभावात्। आद्ये तत्र विधिव्यवहारोऽन्त्ये निषेधव्यवहारस्तत्राङ्गीकृत इत्युभयथाप्यलीके व्यवहारो नास्तीति वदतो व्याघात इत्यर्थः। द्वितीयादिष्वेवेति। समीहायाः

प्रविशतीति न पृथक् निराक्रियते। द्वितीयनिराकरणाय प्रामाणिकनिषेधव्यवहारगीतिमाह। सद्भ्यामिति। ११२, २३ यदि तद्विविक्तेतरस्वभावो यदि चोभयातिरिक्तस्वभाव उभयथापि निषेध्यनिषेधाधिकरणाभ्यामेव निरूप्यते, न त्वेकेन सता निषेध्येन निषेधाधिकरणेन वेत्यर्थः।

ननु सत एव कुतश्चित्प्रमाणप्रतीतान्निवर्त्स्यतीत्यत आह। पश्चादन्यस्येति। ११२, २४

तदनेनासत्यधिकरणे निवृत्तिनिरूपणं प्रतिषिद्धं, निवृत्तौ तु सकतैवोचितेति हृदयम्।

प्रमाणानुरोधित्वादित्यर्थः। तद्विविक्तेतरेति। तस्मादभावाद्विविक्तो-भिन्नो भावः प्रतियोगी तदितरश्च तत्स्वभावः। तेन भावस्य भाव एव प्रतियोग्यात्मक अधिकरणात्मकोवेत्यर्थः। यदि वेति। प्रतियोग्यधिकरणे चेत्युभय तथा च प्रतियोग्यधिकरणातिरिक्त स्वभाव इत्यर्थः। निषेध्यनिषेधेति। निषेधाधिकरणं प्रतियोगि समवायिकारणं अन्यथा कालादि। तज्ज्ञाननिरूप्यत्वभावस्येति प्रकृते विपक्षावृत्तित्व विपक्षे निरूप्यमाण एव निरूप्यत इत्यर्थः। सपक्षतावर्णनोपयोगार्थमाह। नन्विति। नन्वेवमपि निवृत्ति-निषेधे व्याघातप्रसङ्गस्तदवस्थ एवेत्यत आह। तदनेनेति। एव

निवृत्तिरेव प्रतिषिद्धेति भ्रान्तो दूषयति । न निवर्त्तते चेदिति । (११४१-४३)

निरूपणमादाय परिहरति । यस्येति । (११४४-४६) यत्र खलु भावः सर्वथैव न निरूपितः तदधिकरणतया तस्यान्यत्रोपलब्धस्याभावो निरूप्यत इति हार्द, यथा गवि दृष्टस्य शृङ्गस्य शशे । यत्र तु शृङ्गाभावोपि गगनकमलादौ निरूपयितुं न शक्यते तत्र शृङ्गमेव निरूप्यत इत्यलौकिकमित्यर्थः ।

पुनर्भ्रान्तः शङ्कते । तत्किमिदानीमिति । (११४७)

स्ववचनविरोधमधमाशङ्कते । ननु चेति । (११४८)

यदुक्तं ज्ञानश्रिया—

'धर्मस्य कस्य चिदवस्तुनि मानसिद्धा
बाधाविधिव्यवहृतिः किमिहास्ति नो वा ।
क्वाप्यस्ति चेत् कथमियन्ति न दूषणानि
नास्त्येव चेत् स्ववचनप्रतिरोधसिद्धिः' ।

सत्यमिमशङ्का न युक्ता निवृत्तेरनिषेधादित्यत आह । निवृत्तिरेवेति । अलीके कस्यापि धर्मस्य विधिनिषेधव्यवहारो न वा आद्य दूषयति । कथमियन्तीति । अवस्तु कथं विधिनिषेधव्यवहारगोचरः कुतो वा न तत्र व्यतिरेकात् व्याप्तिसिद्धिरित्यादौनीत्यर्थः । अन्त्यं निराकरोति । स्ववचनेति । अवस्तु न विधि-

यद्यपि स्ववचनविरोधभियापि सर्वथा विचारास-होर्थः स्वीकर्त्तुं न शक्यते वचनाद्विचारोगरीयानिति-न्यायात्। अन्यथा विकल्पशब्दौ न वस्तुगोचराविति स्ववचनविरोधादेव परिहर्त्तव्यम्।

तथा हि। स्वलक्षणस्यासाधारण्येनाशक्यसमय[1]तया शब्दस्य च समयाधीनप्रवृत्तिकतया विकल्पस्य च[2] तद्देकविषयतया न तयोर्वस्तुगोचरत्वमिति विचारे शब्दस्य कदाचिदपि वस्तुनि मानसिद्धा बाधाविधि-र्व्यवहृतिः किमिहास्ति नो वा। अस्त्येव चेत्? कथ-मियन्ति न दूषणानि, नास्त्येव चेत्स्ववचनप्रतिरोध-सिद्धिरिति तुल्या विभीषिका॥

तथापि तत्त्वं निरूपयन्परिहरति। न चैतत्त्वत इति। (११५।५)

निषेधव्यवहारगोचर इत्यस्यैव व्यवहारस्य सत्वादित्यर्थः। अन्यथेति। शब्दविकल्पौ न पारमार्थिकविषयाविति स्वसिद्धान्तं सौगतः स्वव-चनविरोधादेव त्यजेदित्यर्थः। विरोधमेवाह। तथाहीति। शब्दस्य सङ्केताधीनप्रवृत्तितया सङ्केतस्य साधारणधर्मपुरस्कारेण सम्भवात् स्वलक्षणस्य चासाधारणत्वेनासङ्केतविषयतया न तच्छब्द-विषयः। विकल्पस्याप्यभिलापसंसर्गयोग्यप्रतिभासत्वात् स्वलक्षणे

(१) गोचरतया इति १ पु० पा०। (२) शब्दसमान इति १ पु० पा०।

ननु यदि नैकतरनिषेधोविधिर्वा तत्किमुभयविधिः निषेधोवा तथासति अतितरां दुर्घट[1]मापद्येतेत्यत आह । नो खल्विति । ११५ । ६

ननु सर्वव्यवहारभाजनमित्यपि निषेधव्यवहारभाजनत्वेनैव निर्वहेत् अन्यथा पुनरपि स्ववचनप्रतिरोध इत्यत आह । उपयोगे वेति । ११५ । ७

स्ववचनविरोधभयाद्धि तदा निषेधव्यवहारगोचरत्वस्वीकारः स्याद्यदि तथा सति भयं निवर्त्तेत, न त्वेतदस्ति । नो खलु सर्वव्यवहारभाजनं च तन्निषेधव्यवहारभाजनं चेति परस्परमविरोधि । विधिव्यवहारमात्राभिप्रायेणाभाजनत्वव्यवहारे कुतोविरोध

च तदभावाद्ध्यावृत्तिविषयकत्वान्न स्वलक्षणं विकल्पविषय इति. यदि विचारे शब्दस्य वस्तुनि विधिनिषेधव्यवहारगोचरत्वं स्वीकृतं तदा दूयन्ति स्वलक्षणेन सङ्केतस्याशक्यतया कथं व्यवहार इत्यादीनि दूषणानि कथं न स्युः । अथ तत्र तन्न स्वीकृतं तदा स्ववचनविरोधः न कस्यापि व्यवहारस्य विषय इत्यस्यैव व्यवहारस्य तत्र स्वीकारादन्ततोऽवस्तुशब्देनैवाभिधानादित्यर्थः । नन्वलीके हेतुतद्व्यतिरेकयोरन्वयव्यतिरेकं न विद्य इत्यनेन नो खल्वित्यत्र पौनरुक्त्यमित्यत आह । यदीति । उपयोगसम्भवार्थमाह । ननु

(१) दुर्घटमिति आह इति १ पु० पा० ।

इति चेत्। हन्त! सकलविधिनिषेधव्यवहाराभाजनत्वेन किंचिद्व्यवह्रियते न वा, उभयथापि स्ववचनविरोधः। उभयथाप्यवस्तुनैव तेन भवितव्यं, वस्तुनः सर्वव्यवहारविरहानुपपत्तेः। नेतिपक्षे सकलविधिनिषेधव्यवहार[1]विरहौत्यनेनैव व्यवहारेण विरोधात् अव्यवहृतस्य निषेद्धुमशक्यत्वात्।

व्यवह्रियत इति पक्षे तु विषयस्वरूपपर्यालोचनेनैव विरोधः। न हि सर्वव्यवहाराविषयः च व्यवह्रियते चेति च।

अपि च यद्यवस्तुनोनिषेधव्यवहारगोचरत्वं विधि-

सर्वेति। विधिव्यवहारमात्राभिप्रायेणाभाजनत्वबाधोविरोधविधूननाय वाच्यः। विरोधस्तु तत्रापि तदवस्थ एवेत्यर्थः। तेनेति। सकलविधिनिषेधव्यवहाराभाजेनेनेत्यर्थः। सकलविधिनिषेधव्यवहाररहितं यदि प्रतीतं कथं तन्निषेधः अलीकप्रतियोगिकत्वात् प्रतीतं चेद्विरोध एवेत्यत आह। नेतिपक्षेति। विषयस्वरूपेति। सकलविधिनिषेधस्य व्यवहाराभाजनत्वाऽव्यवहारेणैव विरोध इत्यर्थः। तमेवाह। नहीति। विधिव्यवहारवन्निषेधव्यवहारोपि प्रमाणाधीनोऽलीके न सम्भवति। अथ तत्र प्रमाणं विनापि निषेधव्यवहारस्तदा विधिव्यवहारोपि तत्र स्यादित्याह। अपि चेति।

(१) हाराभाजनमि० पु० पा०।

व्यवहारविषयतापि किन्न स्यात्, प्रमाणाभावस्योभयत्रापि तुल्यत्वात्। वन्ध्यासुतस्यावक्तृत्वेऽचेतनत्वादिकमेव प्रमाणं वक्तृत्वे तु न किंचिदिति चेत्। न, तत्रापि सुतत्वस्य विद्यमानत्वात्। न हि वन्ध्यायाः सुतो न सुतः तथा सति स्ववचनविरोधात्। वचनमात्रमेतन्न तु परमार्थतः सुत एवाऽसाविति चेत्। अचेतनत्वस्याप्येवंरूपत्वात्। चेतनादन्यत्स्वभावान्तरमेवाचेतनमित्युच्यते। चैतन्यनिवृत्तिमात्रमेव विवक्षितमिह, तच्च संभवत्येवेति चेत्! न, तत्राप्यसुतत्वनिवृत्तिमात्रस्यैव विवक्षितत्वात्।

अलोके निषेधव्यवहारः प्रामाणिक एवेति शङ्कते। तद्व्याघातस्येति। यद्यपि वन्ध्यासुतस्य वक्तृत्वाभावोऽप्यलीक एवालीकस्यानलीकधर्माभावादतः प्रामाणिकत्वे व्याघात एव तथापि बाधासिद्धिभ्यां नैतत्सामर्थ्यमिति प्रतिबन्द्या परिहरति। तत्रापीति। वचनमात्रमिति। वन्ध्यासुतो योग्यतया नान्वयबोधकोऽतो हेतोरसिद्धिरित्यर्थः। अचेतनपदं किं पर्युदासनञा चेतनेतरस्वभावपरं प्रसज्यप्रतिषेधनञा चैतन्यनिषेधपरं वा। आद्यं दूषयति। चेतनादन्यदिति। द्वितीयं शङ्कते। चैतन्येति। निवृत्तेरलीकतयाऽलीके तत्र न विरोध इति भावः। तत्रापीति। अन्यतत्वनिवृत्तिरपि तत्राविरुद्धेत्यर्थः। वक्तृत्वं वचनं प्रति कृतिजन्यत्वं

असुतत्त्व[1]निवृत्तिमात्रस्य स्वरूपेण क्वचिन्नप्योरसामर्थ्यं समर्थमर्थान्तरमवसेयमनन्तर्भाव्य कुतो हेतुत्वमिति चेत्। न, अचैतन्येप्यस्य न्यायस्य समानत्वात्। व्यावृत्तिरूपमपि च तदेव गमकं यदतस्मादेव यथा शिंशपात्वम्।

वन्ध्यासुतस्त्वसुतादिव पटादेः सुतादपि देवदत्तादेः व्यावर्त्तते अतो न हेतुरिति चेत्। नन्वचैतन्यमप्यस्यैवं

तत्र निवृत्तावलौकायां न सम्भवतीति तत्समर्थं स्वलक्षणमन्तर्भाव्य हेतुत्वं न चालौके तथेति शङ्कते। असुतत्वेति। अवसेयमवसायविषयः। स्वविषयमविकल्पकजनकं निर्विकल्पकमवसायः।

अथावक्तृत्वमपि वचनेतरकर्त्तृत्वं तथाचैतन्यं तथैवेति परिहरति। अचैतन्यपीति। वक्तृत्वाभावस्तु यादृशोघटादौ प्रमाणसिद्धस्तस्य साध्यत्वे विरोध एव, अन्यत्र त्वसिद्धतया व्याप्त्यग्रह एवेति भावः। अतस्मादेवेति। विपक्षादेव न तु सपक्षादपि यथा शिंशपात्वमशिंशपात एव व्यावर्त्तते न तु शिंशपातः वन्ध्यासुतस्तु सुतादपि व्यावर्त्ततेऽतोऽसाधारणतया न गमक इत्यर्थः अलौकानलौकवृत्तेरेकस्य धर्मस्याभावादिति भावः। ननु पूर्वं सुतत्वमात्रं हेतूकृतं वन्ध्यासुतस्तु न हेतुत्वेनोपात्तस्तत्कथ सुतादेवदत्तादेस्तस्य व्यावृत्तिः वन्ध्यासुतत्वेन हेतोरनुपादानात्।

(१) असुतत्नि १ पु० पा०।

रूपमेव । न हि वन्ध्यासुतश्चेतनादिव देवदत्तादेरचेतनादपि काष्ठादेर्न व्यावर्त्तते । वक्तृत्वं वस्त्वेकनियतो धर्मः स कथमवस्तुनि साध्यो विरोधादिति चेत् । स पुनरयं विरोधः कुतः प्रमाणात्सिद्धः, किं वक्तृत्वविविक्तस्यावस्तुनो नियमेनोपलंभनात ? आहोस्वित् वस्तुविविक्तस्य वक्तृत्वस्यानुपलंभात् इति । न तावदवस्तु केन चित्प्रमाणेनोपलंभगोचरः । तथात्वे वा नावस्तु । नाप्युत्तरः समानत्वात् । न ह्यवक्तृत्वमपि वस्तुविविक्तं कस्यचित्प्रमाणस्य गोचरः । तद्विविक्तं विकल्पमात्रं तावदस्तीति चेत । तत्संसृष्टविकल्पनेपि को वारयिता ।

अत्राहुः सुतादपीति भावप्रधानो निर्देशः देवदत्तादेरिति व्यधिकरणषष्ठी । तथाच देवदत्तादिनिष्ठसुतत्वादिधर्मशून्यत्व वन्ध्यासुतस्येत्यर्थः । एवं रूपमेवेति । असाधारणानैकान्तिकमेवेत्यर्थः । तदेवाह । नहीति । काष्ठादिसाधारणस्याचैतन्यस्य प्रामाणिकस्यालीकवृत्त्यभावात्तन्मात्रवृत्त्यचैतन्यं हेतूकर्त्तव्यं तत्र चासाधारण्यमेवेत्यर्थः। बाधं शङ्कते । वक्तृत्वमिति । वक्तृत्वविविक्तस्य वक्तृत्वरहितस्येत्यर्थः । वस्तुविविक्तस्य—वस्त्वसम्बद्धस्येत्यर्थः । नहीति । यथा वक्तृत्वं वस्तुविविक्त न प्रमाणविषयः तथैवावक्तृत्वमपीति तत्कथमवस्तुनि साध्यं विरोधादित्यर्थः। तद्विविक्तेति। वस्तुविविक्तमेव वक्तृत्वमितिज्ञानमात्रमित्यर्थः । तत्संसृष्टेति । यदि प्रमाणं

ननु वक्तृत्वं वचनं प्रति कर्त्तृत्वं तत्कथमवस्तुनि, तस्य सामर्थ्यविरहलक्षणत्वादिति चेत्। अ(न्य)थाऽवक्तृत्वमपि कथं तत्र तस्य वचनेतरकर्त्तृत्वलक्षणत्वात्। सर्वसामर्थ्यविरहे वचनसामर्थ्यविरहो न विरुद्ध इति चेत्। अथ सर्वसामर्थ्यविरहो वन्ध्यासुतस्य कुतः प्रमाणात्सिद्धः। अवस्तुत्वादेवेति चेत्। नन्वेतदपि कथम्। सर्वसामर्थ्यविरहादेवेति चेत। सोयं केवलैर्वचनैरितस्ततो निर्धनाधमर्णिक इव साधून् भ्रामयन्परस्पराश्रयदोषमपि न पश्यति।

क्रमयौगपद्यविरहादिति चेत्। न, तद्विरहसिद्धावपि प्रमाणानु[1]योगस्यानुवृत्तेः। सुतत्वे च परामृश्यमाने तदविनाभूतसकलवक्तृत्वादिधर्मप्रसक्तौ कुतः क्रमयौगपद्यविरहसाधनस्यावकाशः कुतस्तरां चावस्तु-

त्विनैव तादृश ज्ञान तदा वक्तृत्वसंस्पृष्टावस्तुज्ञानमप्यस्त्येवेति न विरोधनिश्चय इत्यर्थः। एवं वक्तृत्वस्य वस्तुव्याप्यत्वेनावस्तुनि विरोधः शङ्कित इदानीं अवस्तुनः साध्यरहितत्वात्स्वरूपविरोधं शङ्कते। नन्विति। अवक्तृपदं पर्युदासमाश्रित्य परिहरति। अथेति। प्रसज्यप्रतिषेधमाश्रित्याह। सर्वेति। केवलैर्निरर्थकैरित्यर्थः। क्रमयौगपद्यविरहासिद्धौ न तदान्तत्साध्यमवस्तुत्वमित्याह। कुतस्तरामिति। अवस्तुत्वासिद्धौ न तत्साध्यमपीत्याह।

(१) नुपर्योगस्य इति २ पु. पा.।

त्वसाधनस्य कृतस्तर्मा चावक्तृत्वादिसाधनानाम्। ततश्च प्रमाणमेव सीमा व्यवहारनियमस्य. तदतिक्रमेऽनियम एवेत्यभिप्रायेणेदमुक्तं। उपयोगे वा— निषेधव्यवहारोपयोगे वा। न निरुपाख्यो-ऽवधिव्यवहाराविषयः यस्मिन्किंचिन्निषिध्यते प्रमाणेन तस्मिन् किंचिद्विधीयतेऽपीति नियमादित्यर्थः।

तथापि प्रष्टृत्तरे वक्तव्ये न विरुद्धमनर्थकं वा वक्तुमुचितमित्याशयवानाह। कस्तर्हीति। (१)

उत्तरं। अथेति। (२) उत्तरा(२)विषये अहृदयैर्दैवोत्तरीक्रियते तदेव विरुद्धमित्यर्थः॥

न च केवलमवोत्तरदः प्रष्टाप्यहृदय एव। न

कृतस्तर्मामिति। एवं परमतेन दूषयित्वा स्वमतमाश्रित्योपसंहरति ततश्चेति। तथा चालीके मानाभावान् न वक्तृत्वादिसाधनमित्यर्थः। उपपादितमर्थं टीकायां निवेशयति। अनेनेति। प्रष्टुरिति। धर्मिणः कस्यचिदवस्तुनीत्यादिप्रश्नकर्त्तुः कृत इत्यर्थः। न च तत्त्वनाऽत्र किञ्चिद्विधीयते निषिध्यत इत्यादि निरुद्ध अलीकव्यवहाराविषयत्वे यत्किञ्चित्तद्विषयं वचनं तदनर्थकमित्यर्थः। उत्तराविषय इति। ननु परप्रश्नवाक्यार्थोऽवगतो न वा? न चेदज्ञानं. आद्ये तद्यदि नानूद्यते तदाऽननुभाषणं निग्रहस्थानं. अनूद्य यद्युत्तरं न दीयते तदानीमप्रतिभेति सकलं गारणं।

(१) अनुत्तराविषय इति ४ ५० पा० ।

ह्यप्रतीते देवदत्तादौ गौरः कृष्णोवेति वैयात्यं विना प्रश्नः। तत्रापि यद्येकोऽप्रतीतपरमार्थविषय एवोत्तरं दद्याति न गौर इति, अपरोऽपि किं न दद्यात् गौर इति। न चैवं सति काचिदर्थसिद्धिः। प्रमाणाभाव-विरोधयोरुभयत्रापि तुल्यत्वात्। तदिदमुक्तं अहृदय-वाचामिति। ७७३।८

नन्वप्रतीते व्यवहाराभाव इति युक्तं कूर्मरोमा-दयस्तु प्रतीयन्त एव। नह्येते विकल्पाः किंचिदर्थभेद-मनुल्लिखन्त एव उत्पद्यन्ते। न च प्रमाणास्पदं एव

न चोत्तरार्हं तदुपादानादप्रतिभा. न च प्रकृते तथेति वाच्यम्। उत्तरानर्हत्वस्यापि विभावने मूकत्वानुपपत्तेः।

अत्राहुः— वादकथामाश्रित्यैतदुक्तं। जल्पवितण्डयोस्त्वेव प्रथम प्रश्नविषयो दृश्यते। प्रश्नविषाणपदेन यदि द्रव्यादिसप्तकमेवोच्यते तदा न ततोऽव्यतिरेकः। अथान्यत्तदा निरर्थकं निग्रहस्थान द्रव्याद्यवाचकस्यावाचकत्वात्। न चैव सकलप्रश्नानुपपत्तिः। उभयवादिस्वीकृतेऽर्थे विशेषज्ञानार्थं तदुपपत्तेः। अहृदया एव प्रतिवाच इति टीका। अहृदयत्व प्रतिवाचो अपार्थकोद्भावकत्व-मित्यर्थः। वैयात्यमिति। स्वाज्ञानावरणं वैयात्यं। अनर्थपरस्यैव वस्तुतोऽर्थपरतया मया प्रयुक्तमिति वचनं वा। ज्ञानत्वेनैव व्यवहार-हेतुत्वं न तु प्रमात्वेन यथार्थत्वस्य व्यर्थत्वादतो यदज्ञात तन्मा-व्यवहारि, ज्ञाते तु कूर्मरोमादौ व्यवहारः स्यादित्याह। न चेति।

व्यवहारास्पदमित्यस्ति नियम इत्यत आह। न चात्यन्तेति। (१२४) यद्यपि सर्वथा प्रतीते व्यहाराभाव इति वदतो बौद्धस्यापि स्ववचन[1]विरोध एव। तथाप्ययं विरोधः प्रागेवोद्भावितप्राय इत्येनमुपेक्ष्य शङ्कामात्रं समर्थितम्।

तथा हि— शशविषाणमिति ज्ञानमन्यथाख्यातिः स्यादसत्ख्यातिर्वा। न तावदाद्यस्ते रोचते तथासति किञ्चिदारोपविषयः स्यात्। तथा चारोपविषयस्तत्त्वैतास्त्यारोपणीयं त्वन्यत्रेति जितं नैयायिकैः। नापि द्वितीयः कारणानुपपत्तेः। इन्द्रियस्य ज्ञानानां जनने स्वविषयाधिपत्येनैव व्यापारात। लिङ्गशब्दाभासयोर-

यद्यपीति। अप्रतीते अधिकरणे व्यवहाराभाव इत्यस्येव प्रत्येतुमशक्यत्वादित्यर्थः। शङ्कामात्रमिति। ननु अप्रतीते व्यवहाराभाव इति शङ्का तन्मात्रमित्यर्थः। ख्यात्यन्तरमुभयत्राप्यसम्मतमतः ख्याति द्वयमाह। तथाहीति। असत्ख्यातौ च विचारारम्भकः संशयो द्वितीयसूत्रे दर्शितोऽस्माभिः। अलीकस्य कूर्मरोमादेः प्रतीतिरेव नास्ति कारणाभावात् कुतस्ततो व्यवहार इत्यत आह। कारणेति। विषयाधिपत्येनेति। सन्निकृष्टविषयसहकारित्वेनेत्यर्थः। यद्यपि स्वप्नदर्शने इन्द्रियजन्यं तन्नास्ति जाग्रद्भ्रमस्यापि नेत्रनिमीलनेऽपि दर्शनात् न तत्राप्ययं नियमः। तथापि यदिन्द्रियं तत्केवलपदार्थ-

(१) प्रतिरोध एव इति २ पु० पा०।

प्यन्यथाख्यातिमात्रजनकत्वात् । अपहस्तितस्वार्थयो-श्चासत्ख्यातिजनकत्वे शशविषाणशब्दात्कूर्मरोमादि-विकल्पानामप्युत्पत्तिप्रसंगः नियामकाभावात् ।

स हि सङ्केतो वा स्याच्छब्दस्वाभाव्यं वा ? न ताव-दाद्यः सङ्केतविषयाप्रतीते[1] निराकृतत्वात् । अतएव प्रतीतेरितरेतराश्रयत्वम् । पदसङ्केतबलेन तु प्रवृत्तौ स्वार्थापरित्यागात् । तथा चानन्विताः पदार्था एवा-न्विततया परिस्फुरन्तीति विपरीतख्यातिरेवाऽऽवर्त्तते ।

गोचरप्रमाजनितसंस्कारसचिवं सत्प्रसार्वविषयकसंसर्गज्ञानजनकं भव-तीति नियमः । यद्वा स्वप्नादिस्मरणमय्यारोपविषयार्थसन्नि-कर्षजन्यमस्त्येवेति भावः । निह्नतेति । तयोरुपस्थितपदार्थसंसर्ग-ज्ञानजनकत्वादित्यर्थः । अपहस्तितेति । स्वीकृतपदार्थोपस्थित्यनुप-जीवकयोरित्यर्थः । शशविषाणपदं यदि विकल्पजनकं तर्हि कूर्मरोमाद्यविकल्पविषयप्रयोजकमेव न स्यात् तद्विषयविकल्पो-त्पादकं स्यादित्यापादनार्थः । स हीति । स नियामकः । इतरेति । तत्र सङ्केतग्रहे शशविषाणपदात्तत्प्रतीतिः तत्पदादेव च तत्प्रतीतौ सङ्केतग्रह इत्यर्थः । ननु यथा स्वर्गादिपदानां प्रत्यक गृहीतसङ्केतपदस्यार्थमुपजीव्य वाक्यार्थे सङ्केतग्रहस्तथा शशविषाण पदेऽपि स्यादित्यत आह । पदसङ्केतेति । पदानां प्रत्येकपदार्थ मुपजीव्य संसर्गबोधकत्वमनुपजीव्य वा ? आद्ये अन्यथाख्याति

(१) प्रतीतेरेव पराहत इति २ पु० पा० ।

स्वार्थपरित्यागे तु पुनरप्यनियमः असामयिकार्थप्रत्यायनात्। शब्दस्वाभाव्यात् तु नियमे व्युत्पन्नस्यापि तथाविधविकल्पादयप्रसङ्गः।

वासनाविशेषादिति चेत्। अथास्मदुल्लेखिनः प्रत्ययस्य वासनैव कारणमुत वासनापि? न तावदाद्यः शशविषाणादि प्रत्ययानां सदातनत्वप्रसङ्गात्। कदाचिद्वासनायाः प्रबोधात्कदाचिदिति चेत्। न। प्रबोधोऽपि सहकारिसन्निधानं वा अतिशयपरम्परापरिपाको वा? आद्ये वासनैवेति नियमानुपपत्तिः। द्वितीयोऽपि यद्यर्थान्तरप्रत्यासत्तेस्तदा पूर्ववत्। स्वसन्ततिमात्राधीनत्वे बाह्यवादव्याघातः नीलादिबुद्धीनामपि वासनापरिपाकादेवोत्पादात्। वासनापीति पक्षे तु तदन्योऽपि कश्चिद्धेतुर्वक्तव्यः स च विचार्यमाणः पूर्वन्यायं नातिवर्त्तत इति।

रेवेत्याह। स्वार्थेति। प्रत्येकपदार्थानुपजीवने प्रत्येकपदार्थपरित्यागे सत्येवेति पूर्वोक्तनियमप्रसङ्ग इत्यर्थः। शशेति। अनादिवासनासन्ततेः सदाऽनुवृत्तौ तन्मात्रप्रभवे सदोत्पद्येतेत्यर्थः। अतिशयेति। कुर्व्वद्रूपत्वविशिष्टोत्पत्तिरित्यर्थः। पूर्ववदिति। वासनैवेतिपक्षानुपपत्तिरित्यर्थः। स्वसन्तति वासनासन्ततिः। पूर्वन्यायमिति। इन्द्रियादीनां ज्ञानजनकत्वानुपपत्तौ कारणत्वाभाव

(१) विकल्पानां इति २ पु० पा०।

न च शशविषाणादिशब्दानामसदर्थैः सह सम्बन्धावगमोऽपि। तथा हि परबुद्धीनामनुल्लेखात्तद्विषयस्याप्यनुल्लेख एव। न चार्थक्रियाविशेषोऽप्यस्ति। यतो विषयविशेषमुन्नीय तत्र सङ्केतो गृह्यताम्। न च सङ्केतयितुरेव वचनात्तदवगमः। तद्विषयाणां वचनानां सर्वेषामेवाप्रतीतविषयत्वेनाऽगृहीतसङ्केततया ऽप्रतिपादकत्वात्। न च शशविषाणमुच्चारयतः कश्चिदभिप्रायो वृत्तः तद्विषयोऽस्य वाच्य इति सुग्रहः समय इति वाच्यम्। न ह्येवमाकारः समयग्रहः। गां बधानेत्युक्ते ऽप्रतीतशब्दार्थस्याभिप्रायमात्रप्रतीतौ समयग्रहप्रसं-

इत्यर्थः। एतावता कारणाभावेनासत्ख्यात्यभावमुपपाद्य तत्सत्त्वेपि नालीके तद्विषये सङ्केतग्रह इत्याह। न चेति। यद्यप्ययं पक्षः सङ्केतविषयाप्रतीतेरेवेत्यादिना निरस्त इति तेन पौनरुक्त्यं तथापि सङ्केतविषयाप्रतीतिरेव कथमिति शङ्कानिरासार्थमेतदुक्तम्। परबुद्धिविषयत्वेनैवोपस्थिते तत्र सङ्केतो ग्राह्योऽन्यथा वा? आद्य परेति। उन्नीय परबुद्धिविषयतयेति शेषः। नह्येवमाकारः समयग्रहो विशेषव्यवहारोपयोगीति शेषः। तस्य विशेषसङ्केतग्रहाधीनतया तदभावेनाभावादित्यर्थः। तदेवोपपादयति। गां बधानेति। नापि व्यावर्त्तकधर्मरहिते भ्रमविषयत्वेनैवोपस्थिते

गात। न च विशेषान्तर[1]विनाकृतः कल्पनामात्रविषयोऽस्य वाच्य इति साम्प्रतम्। घटकूर्मरोमादीनामपि तदर्थत्वप्रसङ्गात्। न च सर्वे प्रतिपत्तारः स्वस्वसमयात्[2] सदर्थशब्दसम्बन्धप्रतिपत्तिभाज इति साम्प्रतम्। परस्परवार्तानभिज्ञतया अपरार्थत्वप्रसङ्गात्। न हि स्वयं कृतं संकेतमग्राहयित्वा परो व्यवहारयितुं शक्यते, न च व्यवहारोपदेशावन्तरेण ग्राहयितुमपि। न च गां बध्नानेति वक्तृश्रवितृगणपदार्थे दृष्टव्यवहारः।

समयमात्रेति प्रसङ्गादित्याह। न चेति। अन्यथा देत्याह। न च सर्व इति। परस्परेति। मया योऽर्थोऽवगतः स एवानेनापीति संवादाभाव इत्यर्थः। अपरार्थत्वेति। यद्यसाधारणसङ्केतवत्तया ज्ञानविषयो न स्यात् परार्थविषयो न स्यादित्यापादनार्थः। ईदृशसङ्केतग्रहोऽपि व्यर्थ इत्याह। नहीति। सङ्केतग्रहोपयोगाभावमाह। न चेति। सङ्केतग्रहे व्यवहारस्योपायान्तरासौलभ्यात्तदभावमाह। न च गामिति। प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिदर्शनात्सङ्केतज्ञाने वानेन शक्तिर्गृह्यते, न चालोके प्रवृत्तिदर्शनात्सङ्केतो गृह्येतेत्यर्थः। उपदेशश्च साक्षात्परम्परया वा। आद्यस्याभावमाह। न चायमिति। नात्र विषयत्वेन विशेषसङ्केतग्राहकः शब्द इत्यर्थः। परम्परयोपदेशः शक्तिग्राहकमुपमानं

(१) विशेषान्तर इति २ पु० पा०।   (२) समय इति २ पु० पा०।

न चायमसावश्व इति वदुपदेशः। न च यथा गौस्तथा गवय इति [1]वदुपलक्षणातिदेशः। तदमूः शशविषाणादिकल्पना नासत्ख्यातिरूपाः तथात्वे कारणाभावात् सूकस्वप्नवदसांव्यवहारिकत्वप्रसङ्गात्, तस्मादन्यथा ख्यातिरूपा एवेति नैतदनुरोधेनाप्यवस्तुनो निषेधव्यवहारगोचरत्वमित्यर्थः।

तथापि नासौ सिद्धुपालम्भापयोगीत्याह। कल्पितगोचरश्चेति। १९५। २२

तथाहि। कोऽयं व्यतिरेको नाम? यद्यतो व्यतिरिच्यते तस्य तत्राभावो वा तदभावस्वभावत्वं वा? तत्र तावत्क्रमयौगपद्ययोर्न शशविषाणेऽभावः प्रमाणा-

वा द्वारीकृत्यानुमानं वा। तत्राद्यस्याभावमाह न च यथेति। गवयत्वस्य प्रवृत्तिनिमित्तस्योपलक्षणं गोसादृश्यं तस्यातिदेशः कथनं गवयत्वविशिष्टो धर्मो गवयशब्दवाच्य इति प्रवृत्तिनिमित्तविशिष्टबुद्धरूपमानफलत्वात् सादृश्यस्याप्रवृत्तिनिमित्तत्वादित्यर्थः। अन्यस्याभावमाह। न चेहेति। तेन त्वयाऽभावं प्रतिज्ञाय चतुष्टयाभावकथने विरोधाभाव इति भावः। तथाच सर्व्वत्रोपमानमेव प्रवृत्तिनिमित्तविशिष्टबुद्धेः परिच्छेदकं तच्च तत्रैव वक्ष्यामः। नैतदिति। न केवलं प्रमाणाभावादपि तु शशविषाणादिविक-

[1] दुपलक्षणा ... वृ० ८। १२ ... नि मधुकरः पिबतीतिवत् प्रसिद्धपदसामानाधिकरण्यं तदमूः—इत्यादि अधिकं २ पु० पा०।

गोचरः । वृक्षरहितभूभृत्कटकवत्क्रमयौगपद्यरहितस्य शशविषाणस्य प्रमाणाविषयत्वात् । नापि क्रमयौगपद्याभावरूपत्वं शशविषाणस्य प्रामाणिकं । घटाभाववच्छशविषाणस्य प्रमाणेनानुपलम्भात् ।

घटाभावोऽपि न प्रमाणगोचर इति चेत् । न । तस्य तद्विविक्तेतरस्वभावस्यापि प्रमाणत एव सिद्धेः, असिद्धौ वा तत्राप्यव्यवहार एव ।

घटस्य स्वाभावविरहस्वभावः प्रमाणसिद्धः तादूप्येण कदाचिदप्यनुपलम्भात् एतावतैव तदभावोऽपि घटविरहस्वभावः सिद्ध इति चेत् । न । घटाभावस्य

न्यानरोधादपि तस्य शशविषाणारोपरूपत्वमित्यर्थः । भवतु वा त । उपलम्भो दूषणमसमन्वयात् तल्लौके हेतुमाह्यव्यतिरेकग्राहकमानाभाव इत्यर्थः । वृक्षेति व्यतिरेक दृष्टान्तः यथा वृक्षरहिते राजकटके मान नेव क्रमादिरहिते शशविषाण इत्यर्थः । घटाभाववदिति व्यतिरेकदृष्टान्तः । घटाभावोपीति । व्यतिरेकदृष्टान्तस्यापि घटाभावस्याप्रामाणिकत्वात् सर्वत्राप्रामाणिकेनैव व्यवहार इत्यर्थः । तद्विविक्तेति । तस्मादभावाद्विविक्तो भिन्नः प्रतियोगी घटस्तदितरस्वभावस्येत्यर्थः । तेन यथा स्वाभावविविक्तो घटः प्रमाणसिद्धस्तथा घटविविक्तस्तदभावोऽपीत्यर्थः । एतावतैवेति । यः स्वाभावविरहस्वभावः प्रामाणिको भवति तदभावेनाप्रामाणिकेनापि व्यवहार इत्यतो नातिप्रसङ्गः । घटाभावस्येति । घटाभावो न घटविरह-

तद्विरहस्वभावत्वानभ्युपगमात्। न चान्यस्य स्वभावे प्रमाणगोचरे तदन्योऽपि सिद्धः स्यात् अतिप्रसङ्गात्।

एवम्भूतावेव घटतदभावौ यदेकस्य परिच्छित्तिरेवान्यस्य व्यवस्थितिरिति चेत्। न। घटवद् घटाभावस्यापि प्रामाणिकत्वानभ्युपगमे स्वभाववादान[1]भ्युपगमात्। प्रमाणसिद्धे हि वस्तुनि स्वभाववादालम्बनं, न तु स्वभाववादालम्बनेनैव वस्तुव्यवस्थितिरिति हि भवतामेव तत्र तत्र जयदुन्दुभिः। यदुक्तं वार्त्तिकालङ्कारेः—

> यत्किञ्चिदात्माभिमतं विधाय
> निरुत्तरस्तत्र कृतः परेण।
> वस्तुस्वभावैरिति वाच्यमित्थं
> तदोत्तरं स्याद्विजयी समस्तः।

स्वभावः तस्यालीकत्वेन निःस्वभावत्वादित्यर्थः। क्वचिद् घटाभावस्येति पाठः। तत्र घटरूपाभावो घटाभावविरहरूपः विरहस्य त्वन्मतेऽलीकतया घटस्यापि तद्रूपत्वेनालीकत्वप्रसङ्गः। किञ्चैवमेकस्यापि निरूपणं न स्यादन्योन्यनिरूपणनिरूप्यत्वादित्यर्थः। किञ्च घटस्य स्वाभावविरहस्वभावग्राहकं मानं घटाभावं विषयीकरोति न वा? अन्त्ये क्व तत्सिद्धिरित्याह। न चेति। आद्यं शङ्कते। एवंभूताविति।

(१) नवकाशात् इति २ पु० पा०।

तत्किमिदानीं स्वाभावविरहस्वभावो घटः प्रमाणान्नैव सिद्धः। तव दृष्ट्या एवमेतत्। घटो हि यादृक्तादृक्स्वभावस्तावत् प्रमाणपथमवतीर्णः तस्य यदि परमार्थतोऽभावोऽपि कश्चित् स्यात् परमार्थतः सोऽपि तद्विरहस्वभाव इति तथैव प्रमाणेनावेदितः स्यात्। न चैतदभ्युपगम्यते भवता। तस्मादघटवत्तदभावस्यापि प्रामाणिकत्वेनैवानयोः परस्परविरहलक्षणव्यतिरेकसिद्धिः। अप्रामाणिकत्वे वाऽनयोरपि न तथाभाव इति शशविषाणादिष्वपीयमेव गतिः।

ननु काल्पनिकरूपसंपत्तिरेवानुमानाङ्गमस्त्वित्यत आह। तस्याः सर्वत्र सुलभत्वादिति। (१३।१२) इह-

एवं स्वभावावित्यर्थः। यदा अन्यगोचरप्रमाणादन्यत् सिध्यतीत्यतिप्रसक्तिनियामकः स्वभावभेद एवेत्याह। एवम्भूताविति। घटवदिति व्यतिरेके दृष्टान्तः। तत्किमिति। तथा सति घटः स्वाभावात्मकः स्यादिति भावः। तवदृष्ट्येति। अभावस्य प्रामाणिकत्वे घटस्य तद्विरहात्मकत्वं स्यान्न चाभावः तव मते प्रामाणिक इत्यर्थः। यादृक्तादृगिति स्वभावनिरूपणानिरूप्यत्वमुक्तम्। इयमेवेति। यदि शशविषाणादिकं स्यात्तदा तत्र क्रमयौगपद्यव्यतिरेकस्तद्रूपस्य प्रामाणिकत्वं स्यान्न चाभावः स्यादित्यर्थः। अप्रसक्तनिषेधमाशङ्क्याह। नन्विति। रूपं सपक्षसत्त्वादि। सौगतानां बाधसत्प्रतिपक्षयोरधिकहेत्वाभासत्वाभावादनैकान्तिकासिद्धविरुद्धेषु काल्पनिक-

नवत्वादिसाधने प्रमेयत्वादौ शब्दानित्यत्वादिसाधने चाक्षुषत्वादौ नित्यत्वादिसाधने कृतकत्वादावित्यर्थः ।

ननु पक्षसपक्षविपक्षास्तावदवस्तुवस्तुभेदेन द्विरूपाः तत्र ये कल्पनयोपनीताः तत्र काल्पनिका एव पक्षधर्मत्वान्वयव्यतिरेकाः प्रमाणोपनीतेषु तु प्रामाणिका एवेति विभागः । तदिह काल्पनिकान्निरग्नेर्यद्यपि प्रमेयत्वादेर्व्यावृत्तिः काल्पनिकी सिद्धा तथापि प्रामाणिकाज्जलह्रदादेः प्रामाणिक्येवैषितव्या, सा च न सिद्धेति कुतस्तस्य हेतुत्वम् । एवं प्रामाणिके शब्देऽपि पक्षीकृते प्रामाणिक एव हेतुसद्भावो वक्तव्यः । न चासौ चाक्षुषत्वस्यास्तीति सोऽपि कथं हेतुरिति । एवं कृतकत्वस्यापि वस्त्वेकनियतस्य धर्मस्य वास्तव एवान्वयो वक्तव्यः । वस्तुन एव विपक्षाच्च वास्तव एव व्यतिरेको वक्तव्यः । न च तस्य तौ स्तः । तत्कथमसावपि हेतुरिति । प्रलपितमेतत् । न हि नियामकमन्तरेण सम्पदं प्रति कल्पना त्वरते विपदं प्रति तु विलम्बत इति शक्यं वक्तुं । तथा च निरग्निक-

रूपसम्पदा गमकत्वापत्तिमाह । दहनवत्त्वेति । एवमिति । सपक्षे साधनस्य सत्वमन्वयस्तदभावो विपक्षे व्यतिरेक इत्यर्थः । नहीति । यथा काल्पनिकरूपसपत्तिर्गमिका तथा तादृश्येव लिङ्गरूपवि-

मपि कूर्मरोम सधूममितिकल्पनामात्रेण विपक्षवृत्ति-त्वाद्धूमोनाग्निं गमयेत्। वास्तव्यां रूपसम्पत्तौ किम-नेन काल्पनिकदोषेणेति चेत्। तर्हि वास्तव्यामसम्पत्तौ किं काल्पनिकया[1] तयेति समानम्। विरोधाविरोधौ विशेष इति चेत्। कुत एतत्। उभयोरेकत्र वस्त्ववस्तुत्वादन्यत्रावस्तुत्वादिति चेत्। तत्किं काल्पनिकोऽपि धूमो वस्तुभूतो येन कूर्मरोम्णास्तेन सह विरोधः स्यात्।

क्वचिद्वस्तुभूत इति चेत् निर्धूमत्वमपि क्वचिद्वस्तुभूतमिति तेनापि विरोध एव। तस्माद्यथा काल्पनिकी विपत्तिर्न दोषाय तथा काल्पनिकी सम्पत्तिरपि

परिणामिकः स्यादविशेषादित्यर्थः। नियामकमाह। विरोधेति। धूमस्य वस्तुनः कूर्मरोम्णालीकेन विरोधो धूमस्याभाववत्यालीकस्य तेनाविरोध इत्यर्थः। उभयोरिति। उभयोर्धूमकूर्मरोम्णोरेकत्र धूमेनानुमाने धूमस्य वस्तुत्व कूर्मरोम्णश्चावस्तुत्वमित्यतो धूमस्य कूर्मरोम्णा सम्बन्धोऽविरुद्धः, अन्यत्र धूमस्य व्यतिरेके उभयोर्धूमाभावकूर्मरोम्णोरवस्तुत्वान्न स विरुद्ध इत्यर्थः। तत्किमिति। वस्तुभूतादलीकमन्यदेवेति न तस्यालीकेन सम्बन्धोऽविरुद्ध इत्यर्थः। निर्धूमत्वमपीति। निर्धूमत्वस्य जलह्रदादौ वस्तुत्वेऽपि यथा काल्प-

(1) सम्पत्त्या।

न गुणायेति तस्याश्च सर्वत्र सुलभत्वादितिटीकार्थः। एतच्चाभ्युपेत्योक्तम्।

वस्तुतस्तु न निरुपाख्यं कस्यचिद्व्यवहारस्य भाजनमिति।

ननु यद्यावयोरकुशलतया स्ववचनविरोधः? अथ प्रष्टुः किमुत्तरं वक्तव्यमित्यवशिष्टमुपसंहरन् परिहरति। तस्मादिति। ९२।१४ यत्र वचने सर्वथैव विरोधः तत्रावचनमेव श्रेय इत्यर्थः।

एतेन मूकताहेतुविकल्पाः परिहृता बोद्धव्या इति।

नन्वेकरूपविकल्पमिदं कथं गमकं? गमकत्वे वा

निकेन तेन न विरोधस्तथा धूमस्यापि कचिदसत्त्वे काल्पनिकेन तेन न विरोध इति विपक्षे कूर्मरोमादौ वृत्तो धूमोऽपि नाग्निं गमयेत्। यदि च तत्रालीकोऽवह्निरप्यस्तीति न धूमस्य विपक्षवृत्तित्वं तदाऽविशेषेणाचापि काल्पनिकः साध्यसद्भावोऽस्तीति न विपक्षवृत्तित्वमित्यर्थः। यत्र वचन इति। अपार्थकवचनोद्भावने यत्र विरोधस्तत्रावचनमेव श्रेय इत्यर्थः। एतेनेति। सकौभावे यद्यज्ञानमेव हेतुस्तदा अज्ञानमेव निग्रहस्थानं, अथ ज्ञानमस्ति? तदा यद्यनुवादस्तदाऽननुभाषणं निग्रहस्थानं, यदि चानुद्याप्युत्तरास्फुरणं? तर्ह्यप्रतिभेति यद्विकल्प्य दूषणमापादितं तत्परिहृतं उत्तरार्हे उत्तराप्रतिपत्तिरप्रतिभेति तल्लक्षणादित्यर्थः। अगमकत्वे हेतुर्नोक्त इति तमाह। नन्विति। सपक्षान्वयविपक्षव्यतिरेकाभ्या-

व्यतिरेकविकलवद्रूपान्तरविकलमपि तथा किं न स्यादविशेषादित्याशंक्याह। न चैतावतेति। (२।५।४३) रूपान्तरवैकल्यवन्न व्यतिरेकवैकल्यमविनाभावक्षतिमावहतीत्यर्थः।

एवं तर्हि सत्यपि विपक्षे व्यतिरेको न [१]परेषणीय इत्यत आह। विपक्षस्याभावे त्विति (२।५।४४) विपक्षे सति तत्र वृत्तिशङ्का ततश्च तन्निवृत्त्यर्थं तदुपयोगः, विपक्षाभावे तु शङ्कैव नास्ति, यथोक्तं प्राक्। तोयाभ्यवहरणेऽप्यसमर्थस्य मुमूर्षोर्न हि शष्कुलीभक्षणं शङ्कते चेतन इत्यर्थः।

स्वमते त्विति। (२।५।४५) अस्य तु कात्स्न्येनिकोऽपि विपक्षः परेणाभिधातुं न शक्यते अभिधाने सपक्षत्वा-

मेव व्याप्तिग्रहात् केवलान्वयिनश्च विपक्षाभावात्तत्र व्यतिरेकाग्रहात् व्याप्त्यग्रहेण कथं गमकत्वं गमकत्वे चापक्षधर्मादेरपि गमकत्व मित्यर्थः। नन्वेवमन्वयोऽपि सपक्षव्यतिरेकशङ्कानिराकरणेनोपयुक्त इत्यन्वयव्याप्तिरप्यप्रयोजिका स्यादित्यत आह। विपक्षेति। अन्वयव्यतिरेकव्याप्त्योः प्रत्येकमन्यत्र प्रयोजकत्वानगमाद्युगपदुभयव्याप्त्युपस्थितौ विनिगमनाभावादुभयोरपि प्रयोजकत्वे सति व्यतिरेके विपक्षवृत्तिशङ्कानिवृत्त्या व्यतिरेकव्याप्तिः सिध्यतीति शङ्कानिवृत्तिरुक्तेत्यर्थः। अभिधान इति।

(१) गवेषणीय इति ४ पु० पा०।

पत्तेः असपक्षत्वेऽनाभिधानप्रसङ्गात्। ततश्चाभिधेयत्वे साध्ये यः कश्चिद्धेतुरुपादीयते तस्य किं विपक्षे वृत्ति-रवृत्तिर्वेतिप्रश्ने अनेनोत्तरं कोविदेन किं वक्तव्यम्। मूकीभूय तिष्ठामोऽस्तु न कश्चित्प्रतिमल्ल इति स्वयमेवोल्लपितमनेन। नत्वेवम्भूतोऽहेतुरेव दोषाभावात्। अरुचिमात्रस्य सर्वत्र सुलभत्वादिति। भागासिद्धि-निराकरणाय व्याप्यति वदतः।

ननु यथाऽऽकाशपदात्मसंस्कारसाचिव्येन शब्दाश्रयत्वमनभिधेय-मप्युपतिष्ठते तथाऽभिधेयविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् एवं चाभिधेयत्वं कुतोऽपि व्यावर्त्तेत धर्मत्वाद्गोत्ववत्। न च व्यावृत्तत्वस्याव्यावृत्तत्वे तदेव केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तत्वं व्यावृत्तं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिक-त्वादेवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वेऽत्यन्ता-भावप्रतियोगित्वमेव केवलान्वयि, अत्यन्ताभावप्रतियोगित्वे च यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवला-न्वयि। न च व्यावृत्तत्वमत्यन्ताभावत्वं च नानेति वाच्यम्। अनु-गतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः तन्न तावदव्याप्यवृत्तिसंयोगा-त्यन्ताभावः केवलान्वयी तस्य प्रतियोग्यवच्छिन्नेऽत्यन्ताभावात्। अत्यन्ताभावाप्रतियोगिनः केवलान्वयित्वात्। नापि स्वाश्रयनाश-जन्यगुणादिनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम्। यत्र हि प्रतियोगिप्रागभावो वर्त्तते तत्र न तदत्यन्ता-

भावो वर्त्तते। तथा च नाशस्य प्रागभावो यत्र नाशप्रतियोगि-
समवायिदेशे वर्त्तते तत्र कथं नाशात्यन्ताभावो वर्त्तते इति।
तर्हि तत्र नाशस्य वृत्तिः स्यादिति चेन्न। पूर्वं तत्र नाशस्य
प्रागभावस्यैव सत्त्वात्। तदुत्तरकाले चाश्रयस्यैव भावात्। नाप्या-
काशात्यन्ताभाव एव केवलान्वयी तस्यापि प्रतियोगिरूपात्यन्ता-
भावप्रतियोगित्वात्। अथाभावात्यन्ताभावो न प्रतियोगिरूपः।
तथासत्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगि-
समानदेशोऽन्योन्याभावो न स्यादिति चेत्। न। प्रतियोग्यत्य-
न्ताभावा[illegible] प्रतियोग्येव अन्योन्याभावात्यन्ताभावस्तु प्रति-
योग्यवृत्तिरसाधारणो धर्म इति वैषम्यात्।

अत्राहुः। वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं
आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी
तथापि स न वृत्तिमानित्यत्यन्ताभाव एव केवलान्वयी। तथा
प्रमेयत्वाद्यपि केवलान्वयि आकाशात्यन्ताभावाप्रतीतावपि तत्प्र-
तीतेः। न च प्रमेयत्व तथा प्रमायाविषयत्वस्य चाननुगमादिति
चेत्। न। प्रमात्वस्यैव परम्परासम्बन्धेन प्रमाविषयत्वेनानुगमा-
दिति संक्षेपः।

नन्वेवमपि केवलान्वयिनि संशयाभावात् कथमनुमितिः?
प्रमेयत्वमत्र वर्त्तते न वेति संशय इति चेत्। न। तस्य प्रमेयत्व-
विशेष्यकत्वात्। न चेदं प्रमेयं प्रमेयत्ववच्चास्तीति एक एवार्थः।
विशेषणविशेष्यभावभेदेनार्थभेदात्।

अत्राहुः य एव पक्षे संशयः साध्यसिद्धिविरोधी स एवाङ्ग न

पूर्ववदित्यतिशायने मतुपो विधानम्, अतिशयश्च व्याप्तिरेवेत्याशयः। तदिदमुक्तं टीकाकृता अस्ति गंधवत्त्वस्य साध्यं न तु व्याप्येति। ११६।३

ननु साध्यमजातीये शेषशब्दस्य न काचिद्वृत्तिरित्यत आह। साध्यस्योपयुक्तत्वादिति। ११६।५

पौनरुक्त्यभ्रममपाकरोति। पदानि विभज्येति। ११६।८ नञमन्तर्भाव्य व्याख्याने सामान्यतो दृष्टपदमेवं

तु पक्षविशेषणत्वमपि तन्त्रं गौरवात्। प्रमेयत्वं न वेति संशयो विरोधी न भवत्येव। यद्वा प्रमेयत्वमत्यन्ताभावप्रतियोगी तिभ्राम्यतोऽत्र संशयः। अथवा संशयो नानुमानाङ्गमपि तु तद्योग्यता। न च साऽपि साधकबाधकप्रमाणाभावः प्रमेयत्वाभावस्य चाप्रसिद्धा तत्र प्रमाणासिद्धौ बाधकाप्रसिद्धिरिति वाच्यम्। पक्षनिष्ठात्यन्ताभावप्रतियोगित्वस्यैव साध्ये बाधकत्वात्। तदभावस्यैव योग्यत्वात्।

पूर्ववदित्यते यथा पक्षव्याप्तिलाभः तदाह। अतिशायन इति।

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।

संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादय'

इति वृत्तिकारः। न चैकपक्षकलिङ्गाव्याप्तिः। पक्षतावच्छेदकधर्मसमानाधिकरणात्यन्ताभावाप्रतियोगित्वस्य तदर्थत्वात्। गन्धवत्त्वस्य च पक्षतावच्छेदकपरमाणुत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्।

योजनीयम् । उक्तविशेषरहितत्वेन विपक्ष एव सामान्य इत्युच्यते, तदादृष्टं, ससम्यास्तसिः, योग्यदर्शननिवृत्त्या च दृश्यनिवृत्तिर्विवक्षिता । तेन विपक्षे असदित्यर्थः ।

अतः - - - - - - त्तिमभ्युपेत्य रूपद्वयसंपदे चकार-मवतारयति । तथाचेति । (१२१ । ७)

तदेवं तत्पूर्वकमित्यनेन लिङ्गपरामर्शोनुमानमिति लक्षणार्थे व्याख्याते अथ किं लिङ्गं कतिविधं चेति जिज्ञासायां त्रिविधमित्यवच्छेदेन व्याख्याय किं लक्षण-

- -

उक्तानुरूपति । पक्षधर्मराहित्येन च तयोर्विपक्षः समानः साधारणो भवतीत्यर्थः । ननु विपक्षवतोप्यदृष्टत्वसंभवान्न तावता विपक्षासत्त्वं लभ्यत इत्यत आह । योग्येति । प्रत्र कृत्वेतिटीव..

- - अनुमानत्रयेऽप्यन्वित कृत्वत्यर्थः । यद्यपि यत्र कश्चिद्बाधका-भावाऽसिद्धः प्रकृतपक्षकप्रकृतसाध्याभावस्य सिद्धासिद्धिव्याहतः तथापि साध्यधर्मे पक्षनिष्ठात्यंताभावप्रतियोगित्वग्राहकमानाभाव एवाबाधितविषयत्वात्स्वतः सिद्धवदिति न तु केवलव्यतिरेक्यपि सपक्षे वर्त्तते साध्यवन्मात्रस्यैव सपक्षत्वेन पक्षस्यापि सपक्षत्वात् । तत्र तस्य वृत्तः । न तु पक्षभिन्नत्वमपि तन्त्रं गौरवात् । अभेदानु-माने पक्षस्यैव सपक्षत्वात्सर्वमभिधेय प्रमेयत्वादित्यादीनां विधात्रय-बहिर्भावोपपत्तेः । न च निश्चितसाध्यवान्सपक्षः पक्षश्च न तथेति वाच्यम् । यत्किंचिन्निश्चयस्य सपक्षेप्यभावात् वादिप्रतिवादिनिश्चयस्य च कचित्सपक्षेप्यभावात् । अत्राहुः । पक्षत्वावच्छेदकादन्येन

मिति जिज्ञासायां पूर्ववदित्याद्येकवाक्यतया व्याख्याने परामर्शविषयः संज्ञितो विभक्तो लक्षितश्च। विषयविषयिणोरभेदविवक्षया च सामानाधिकरण्यमिति मन्तव्यम्।

एवमन्यान्यपीति। ... तद्यथा। मनोज्ञमत्तकाशिनीसंदर्शनेन संसारिणि रागानुमानं, शत्रुदर्शनेन क्रोधानुमानं, श्रद्धावतां यथाविधि यागाद्यनुष्ठानेन

प्रकारेण निश्चितसाध्यवत्त्वस्यैव सपक्षत्वादिविभागो युक्तः। यद्वा अन्यत्र साध्यवत्त्वमात्रस्य सपक्षत्वेऽपि च पक्षातिरिक्तत्वं विवक्षित्वा तद्विभागः कृतः। ननु पूर्ववदादिना लिङ्गस्यानुमानत्वमुक्तमतो लिंगपरामर्शोऽनुमानमिति सामानाधिकरण्येन न युक्तमित्यत आह। विषयेति। अत्र कारणात्कार्यानुमानोदाहरणमन्त्यतन्तुसंयोगात्पटस्य कार्यस्यानुमानं न युक्तं पटोत्पत्तेः प्रागिन्द्रियसन्निकर्षे सति अन्त्यतन्तुसंयोगोत्तरमेव तत्प्रत्यक्षता पटोत्पत्तिस्त्वेकः कालस्ततो व्याप्तिस्मृतिकाले पटे रूपाद्युत्पत्तेः यदैव लिंगपरामर्शः तदैव पटस्य प्रत्यक्षता ज्ञानगोचरत्वादित्यत आह टीकाकारः अपि चेति। यदि त्विति टीका। पूर्व्वमेव स्मृतव्याप्तिरन्ध्ये ततो यदुत्पन्नं कर्म्म तदिन्द्रियार्थसन्निकर्षात् यदा प्रथममेवालोचयति तदैव क्रियातो विभागः। ततो विभागात् पूर्व्वसंयोगनिवृत्तिः। तथाचेयं क्रियेति तृतीयलिंगपरामर्शस्योत्पादस्त्वेकः कालः पटारम्भकान्त्योपान्त्यतन्तुसंयोगकाले तृतीयलिंगपरामर्शादनुमितिः। ततस्तृतीयक्षणे पटः प्रत्यक्ष इत्यर्थः। शत्रुदर्शनेति। शत्रुत्वप्रकारकदर्शनेनेत्यर्थः। अत्रापि

धर्मानुमानं, विषयभोगेन सुखानुमानं, अविकलेन्द्रियस्य योग्यविषयावधानेन ज्ञानानुमानं, निषिद्धाचरणेनाधर्मानुमानं, पटुभ्यासादरप्रत्ययैः संस्कारानुमानं, मिथ्याज्ञानेन भविष्यत्संसारप्रवाहानुमानमित्यध्यात्मम् । बाह्ये ज्वलन्तं तृणराशिमुपलभ्य भविष्यद्भस्मानुमानं, तथाविधवृष्ट्या भविष्यन्नदीपूरादिज्ञानं, प्रकारान्तरावगतेन वायुना त्वरावता वृक्षादिक्षोभानुमानमित्यादि ... ।

दुरवबोधमिति । सामान्यतोदृष्टस्वरूपस्यैवाविवेचनादित्यर्थः । उदाहरणद्वारेण तद्विवेचनं भविष्यतीत्यत आह । शेषवदुदाहरणान्तर्गतं चेति ।

शेषवल्लक्षणयोगेऽपि तदुदाहरणान्तरवैलक्षण्येनेदमेव सामान्यतोदृष्टपदार्थो भविष्यतीत्यत आह । न चैतावतेति ।

न तावदश्वकर्णादिशब्दवदयं सूत्रेऽनुमाने वर्तते । अन्यत्रापि वृद्धप्रयोगात् । नापि सूत्रकारस्यैव परि-

---

संसारिणीतियोऽन्यमतो न हीनक्रमेण व्यभिचारः । विषयभोगेनेति । भोग्यविषयसन्निकर्षेणेत्यर्थः । योग्येनेत्युक्तान्यकारणोपलक्षणमतो नालोकादिविरहे व्यभिचारः । अविवेचनादिति । विवेचनोपायस्य

भाषेयं निःप्रयोजनत्वात्। तस्मादुदाहरणवैलक्षण्यमात्रविवक्षयेदमुच्यते तथा चातिप्रसङ्ग इत्यर्थः। तस्माद्भाष्यकारव्याख्यानविरुद्धोदाहरणमाचाख्यानमरोचयमानः सामान्यतो दृष्टपदं व्याख्यायान्यथोदाहरणमाहेति योजना।

क्षयवृद्धिप्रत्ययाविषयत्वे सतीति ...... स्पष्टार्थम्। प्राङ्मुखोपलभ्यत्वे परिहृश्यमानत्यर्थविषयत्वादिति पर्यालोचनयैवाविनाशस्य प्राप्तत्वात्। न ह्युपलब्धविनाशे उपलब्धं प्रत्यभिज्ञायते सन्तावप्यनुपलब्धमुपलब्धतयेति। प्राङ्मुखोपलभ्यत्वेत्यस्य टीकया स्फोरितस्य प्राङ्मुखोपलब्धस्य प्राङ्मुखेनानुपलम्भ सतीत्यर्थः। नरान्तरस्य ...... तत्समानदेशस्थस्येति मन्तव्यम्। अन्यथा मार्त्तण्डमण्डलस्यापि लोकान्तरवर्त्तिपुरुषापेक्षया प्राङ्मुखोपलभ्यता दुर्वारेत्यमिदं विशेषणं

लक्षणस्याज्ञानादित्यर्थः। उदाहरणेति। सूर्य्यवज्ज्ञानमानद्वारा सामान्यतोदृष्टस्यैव विवेचनं स्यादित्यर्थः। ननु भाष्यकारव्याख्यातमित्ययुक्तं तेनाव्याख्यातत्वादित्यत आह। विरुद्धेति। तेन व्याख्यानपदं विरुद्धोदाहरणाख्यानपरमित्यर्थः। तथापि भाष्यकारव्याख्यानापेक्षयाऽन्यथा व्याख्यायेत्ययुक्तं तेनाव्याख्यातत्वादित्यत आह। अन्यथोदाहरणमिति। अनुपलब्धमेवेति। इन्द्रियसन्नि

स्यात । तदेतन्नरपदेन सूचितम् । तदभिमुखदेश-सम्बन्धादिति ।।२८।। शिष्यहिततया व्यभिचारौपयिक-पादविहरणज्ञापनाय । नहि यथातथा पादविहरण-मात्रमस्य हेतोः क्षतिमावहतीति । सत्यविनाश इति च द्रष्टव्यम् । ।।२९।। द्रव्यत्वे सतीति शेषः ।

इह यद्यपि दिशः प्रत्यक्षत्वे साध्येऽङ्गुल्या[१] निर्देशो व्यधिकरणस्तरुनगरादिष्वेवाङ्गुल्या व्यपदेशात् । दिशः सामानाधिकरण्यं त्वङ्गुलीव्यपदेशस्य न तदधि-करणासाधनमन्यथासिद्धत्वात् । ----ते तरवः सा प्राचीति तरुादिभेदेनाप्यङ्गुल्या व्यपदेशोऽस्तीति न व्यधिकरणत्वमाहत्याभिध तुं शक्यत इत्यनेनाभिप्राये-णान्यथासिद्धिमेव वार्तिकार्थ इत्याह । अन्यथा सिद्धत-येति । ।।३०।।

कष्टलादुपलभ्यमानमेव पूर्वोपलब्धतया प्रत्यभिज्ञायत इत्यविनाशः तत्रापि लभ्यत एवेत्यर्थः । शिष्यहिततयेति । अनुत्पन्नपादविहारस्य प्राङ्मुखोपलभ्यस्य प्राङ्मुखत्वानुपलम्भादित्यनेनैव तुहिनाचलतुल्यतया प्रासादस्यापि व्यावर्तितत्वात्तदभिमुखसम्बन्धादितिव्यर्थमिति व्यभि-चारज्ञापकपादविहारबोधनार्थमेवेदमित्यर्थः । द्रव्यत्वे सतीति । तथा च गुणादिभिर्न व्यभिचार इत्यर्थः । आहत्येति । याव-दन्यथासिद्धिर्नोच्यते तावदित्यर्थः । अतेनेत्यस्य विशेषणस्योपयोगार्थं

(१) व्यपदेशादिति पाठ २ पु० ।

उपलक्षणं चैतत्। चलन्तीं पताकामुपलभ्यायं वायुर्वातीति अङ्गुलीनिर्देशस्याचाक्षुषे वायावपि गतत्वेन व्यभिचारस्यापि सम्भवात्। रूपेण स्पर्शानुमानमित्यादावादिग्रहणेन रसेन रूपानुमानं गन्धेन रसानुमानमित्यादि। वृक्षादर्शने सन्देहे वा शिंशपादर्शनं निश्चयो वा ततोऽनवसरपराहतमेवानुमानम्। वृक्षशब्दप्रयोगलक्षणव्यवहारानुमानं तु न स्वार्थमविदितसमयेनाशक्यत्वात्। विदितसमयस्य च व्यर्थत्वात्। परोऽपि यदि व्युत्पन्नो यदि विदितशब्द-

दृष्टेन शिंशपात्वेन वृक्षत्वानुमानेऽनुपपत्तिमाह। वृक्षेति। सामान्यज्ञानदशायां विशेषाज्ञानादितिभावः। अथ वृक्षशब्देन व्यवहर्त्तव्यः शिंशपात्वादितिव्यवहारानुमानं स्यादित्यत आह। वृक्षशब्देनेति। तद्धि स्वार्थं परार्थं वा? आद्ये प्रमाता किमगृहीतसङ्केतः तद्विपरीतो वा? नाद्यः साध्याप्रसिद्धिरित्यत आह। अविदितसमयेनेति। न द्वितीयस्तादृशेन व्यवहारस्य ज्ञातत्वान्निःप्रयोजनमनुमानमित्याह। विदितेति। परार्थमिति दूषयति। परोपीति। व्युत्पन्न इति। वृक्षपदे गृहीतसङ्केत इत्यर्थः।

विदितप्रवृत्तिनिमित्त इति। पुरोवर्त्तिनि प्रत्यक्षीकृतवृक्षपदप्रवृत्तिनिमित्त इत्यर्थः। तादृशं प्रति व्यर्थमनुमानमिति[१]।

(१) इत्याहेत्यर्थ।

प्रवृत्तिनिमित्तस्तदा स्वयमेव व्यवहरेत विपरीतस्तु[1] शिंशपात्वमपि न प्रतीयात् । अव्युत्पन्नश्चेत्समयमग्राहयित्वा व्यवहारयितुमशक्य एव । न चायं समयग्रहप्रकारः तथा सति शिंशपात्वादयं वृक्षो व्यवहर्तव्य इति शिंशपात्वमेव वृक्षशब्दप्रवृत्तिनिमित्तमाकलयेत । न शिंशपात्वादयं वृक्षशब्दप्रवृत्तिनिमित्तवानिति वाक्यार्थः विदिततन्निमित्तं प्रति व्यर्थत्वात । विपरीतं प्रत्यप्रसिद्धविशेषणत्वप्रसङ्गात । सामान्योपक्रमे समयग्रहानुप ...। पुरुषेच्छामात्राधीनत्वाच्च समयस्य पक्षधर्मतया नियन्तुमशक्यत्वात । अविदितसमयं प्रति

तदेति । विपरीत इति पुरोवर्त्तिन्यप्रत्यक्षीकृतवृक्षपदप्रवृत्तिनिमित्त इत्यर्थः । शिंशपात्वमपि न प्रतीयात् । न प्रत्यक्षयेदित्यर्थः । सामान्यस्याप्रत्यक्षीकरणे विशेषस्याप्रत्यक्षीकरणादितिभावः । अव्युत्पन्नश्चेदिति । वृक्षपदे अगृहीतसङ्केत इत्यर्थः । नन्वयं किञ्चिद्वृक्षशब्दप्रवृत्तिनिमित्तवान् शिंशपात्वादित्यनुमानं स्यादित्यत आह । सामान्योपक्रम इति । तावतापि प्रवृत्तिनिमित्तविशेषानिश्चयादित्यर्थः । ननु वृक्षे पक्षे वृक्षपदप्रवृत्तिनिमित्तं सिध्यत् पक्षधर्मताबलाद्वृक्षत्वे प्रवृत्तिनिमित्तविशेषे पर्य्यवसास्यतीत्यत आह । पुरुषेति । पक्षधर्मताबलादपि न विशेषः सिध्यत्सङ्केतस्य पुरुषेच्छाधीनतयाऽन्यथापि तत्सङ्केतसम्भवे द्रव्यत्वादिप्रवृत्तिनिमित्तमशयस्य तदवस्थत्वादित्यर्थः । अविदितसमयं इति । अविदितवृक्षशब्द-

(१) अविदितशब्दप्रवृत्तिनिमित्त इत्यधिकं २ पु०

चान्वयोपक्रमस्याऽयुक्तत्वादित्यत आह। अतेनेति। ११४।१० तदनेन ये चान्ये साध्यसमानकालास्ते सर्वे सामान्यतोदृष्टानुमानसंग्राह्यत्वेनोपलक्षिता इति।

स्वमतेन व्याख्यानान्तरं न तु तात्पर्यान्तरमित्यर्थः। पूर्वं साध्यं तद्यस्य व्याप्तेत्यनेनैकतात्पर्यत्वात्। अनेनैवाभिप्रायेणाह। अत्रापि यथासम्भवमिति। ११४।१८ नञनन्तर्भावचकारनिरपेक्षतं चास्मिन् व्याख्याने पूर्वस्मादिशेषः। सामान्येन कार्यं वा कारणं वाऽनुभयात्मकं वा अविनाभावितया दृष्टं निश्चितं सामान्यतोदृष्टमेवं च योजना। तदिदमुक्तं असंदिग्धता माहेति। तत्र तत्पूर्वकमिति। स्वरूपविप्रतिपत्ति-

प्रवृत्तिनिमित्तं प्रति साध्यासिद्धाऽन्वयिनोनुपपत्तिरित्यर्थः। अतेनेतीति। तथा चाप्रत्यक्षे शिशपात्वे शब्दादिना तज्ज्ञानाद्वृक्षत्वानुमानं भवेदितिभावः। साध्यसमानेति। अकार्यकारणभूता इत्यर्थः। नन्वत्रापि व्याख्याने पूर्ववच्छेषवत्पदयोः पक्षव्यापकत्वसपक्षवृत्तित्वात्र व्याख्यानान्तरत्वमित्यत आह। नञिति। पूर्वव्याख्याने नञन्तर्भावेन विपक्षावृत्तित्वमसत्प्रतिपक्षत्वमबाधितत्वं च लभ्यमत्र तन्निरपेक्षेणैव तल्लाभ एतावता च व्याख्यानान्तरत्वमुक्तमित्यर्थः। यथा नञर्थनैरपेक्ष्येण तल्लाभस्तथा व्याचष्टे। सामान्येनेति। ननु तत्पूर्वकमित्यतः कथं स्वरूपविप्रतिपत्तिनिराकरणमित्यत आह।

निवृत्तिः स्वलक्षणसामर्थ्येन न्यूनाधिकसंख्यत्वाशङ्का-
निवृत्तिः प्रथमं तात्पर्यं, नियमज्ञापने त्वशक्यलक्षणत्व-
शङ्कानिवृत्तिस्तात्पर्यमिति न पौनरुक्त्यमिति वृत्त-
वर्त्तिष्यमाणानुकीर्तनफलम् ।

यद्यपि प्रतिपन्नं प्रत्यनुमानस्य न संशयविपर्यय-
निवृत्तिरज्ञातज्ञानं चोपयोगस्तथाप्यध्यवसिताभ्यनुज्ञानं
वस्तुबलायातमपेक्षितं विषये ऽनुपेक्षणीयमेवेति
तस्याप्यनुमानप्रतिपाद्येषु गणना । तेनादिवाक्ये[1]
प्रतिपन्नः प्रतिपादयितेति प्रतिपन्न एव प्रतिपादयिता
न तु प्रतिपन्नः प्रतिपादयितैवेति बोद्धव्यम् ।

पुनः पौनरुक्त्यपरिहाराय वृत्तवर्तिष्यमाणे ऽनुकीर्त-
यति । पूर्वं सिद्धवदिति ।

साक्षात्कृत्यनुमित्योः क्रिययोस्तुल्यता विषयगता

लक्षणसामार्थ्येनेति । धर्मिस्वरूप एव न तद्विप्रतिपत्तिः सिद्धसिद्धि-
व्याघातादितिभावः । अत्र धर्मिणि सा स्यात्सा च तल्लक्षणादेव
निराक्रियत इत्यर्थः । वृत्तवर्त्तिष्यमाणेति । टीकायां न्यूनाधिकसंख्या-
व्यवच्छेदेनेत्यादिः वृत्ता, संप्रतीत्यादिवर्त्तिष्यमाणम् । यद्यपीति ।
पूर्वोत्पन्नसंशयस्य पूर्वविप्रतिपत्त्येव निवृत्तेर्न तन्निवृत्तिरूपोपयोग
इत्यर्थः । तथापीति । न च प्रतिपन्नस्य संशयाभावेन सिद्धसाधनात्

(१) प्रमाणेत इत्यादि वाक्य व्याख्यान इत्यर्थ ।

द्रष्टव्या। तेनायमर्थः। व्याप्तिग्राहकप्रमाणयोग्योधर्मी यत्रानुमीयते तत्पूर्ववदनुमानं, तदयोग्यस्तु सामान्य-

कथमनुमितिरिति वाच्यम्। निश्चितस्याप्यर्थस्यान्तरा विस्मरणे सत्युत्तरकाले तस्यापि सम्भवात्। व्याप्तिग्राहकेति। येनैव धर्मिणा सह व्याप्तिग्रहस्तस्यैव व्यक्त्यन्तरेऽनुमानं पूर्ववत्। यथा सास्नावत्त्वेन गोत्वानुमानम्। यत्तु दृष्टान्तजातीयस्यास्य व्यक्त्यन्तरेऽनुमानन्तत्सामान्यतो दृष्टं यथा धूमेनाग्निरित्यर्थः। यदेन्द्रियकातीन्द्रियधर्मानुमानत्वाद्द्वयोर्भेद इत्यर्थः।

टीकायां दिङ्नागवार्त्तिकस्यायमर्थः। केचिद्धर्मान्तरमग्निमत्त्वरूपमनुमेयमिच्छन्ति। अत्र युक्तिमाह लिङ्गस्येति। लिङ्गस्य धूमस्याग्निना सहाव्यभिचारोव्याप्तिर्यतः पक्षान्तरमाह सम्बन्धमिति। अग्निधूमयोरिति शेषः कृतः। सिद्धत्वादिति। सम्बन्धिनोः सिद्धत्वेन सम्बन्धस्यापि सिद्धत्वादित्यर्थः। तत्राद्यं दूषयति। लिङ्गमिति। धर्मोऽग्नौ लिङ्गं धूमरूपं यदि सिद्धं पक्षधर्मतया ज्ञातं तदा तेन धूमेन किमन्यदनुमेयमग्नेर्ज्ञातत्वात्। अथेति। धर्मिणि पर्वते यदि ज्ञातं लिङ्गमनुमापकं वह्नेस्तथा तस्यैव पर्वतस्यैव किन्नानुमेयता पर्वत एव तद्वाग्निमत्तयाऽनुमेयोऽस्तु, न तु स्वातन्त्र्येणाग्निरित्यर्थः। सम्बन्धं साध्यं दूषयति। सम्बन्धेऽपीति। इयं वक्ष्यमाणम्। तत्राद्यमाह। षष्ठीति। यदि सम्बन्धोऽनुमेयः स्यात् तदाग्निधूमयोः सम्बन्धोऽस्तीति षष्ठीश्रवणं प्रतिज्ञावाक्ये स्यादित्यर्थः। दूषणान्तरमाह। अवाच्य इति। अप्रतिज्ञेयः

तोदृष्टमिति। धूमत्वैकार्थसमवायिभिरिति [illegible] सतात्पर्यं विशेषणं. नहि संततमूर्ध्वगमनमात्रेणाग्नि-रनुमातुं शक्यते। धूलीपटलादौ व्यभिचारात। एक-द्रव्यत्वादित्यस्य सपक्षै[illegible]पादावन्वयस्य स्पष्टत्वात् विपक्षव्यतिरेक एवोक्तः।

द्विविधमेव हीति। [illegible] न्त्वत्रान्वयाभिधानमात्रेण

सम्बन्ध इत्यर्थः। [illegible] धूमवत्त्वादग्निरस्तीत्यत एवास्मदभि-मताग्नि[illegible]शिष्टदेशसाध्यादर्थतोऽग्निधूमयोः सम्बन्धस्यावगतेरित्यर्थः। दूषणान्तरमाह। न चेति। धर्मी सम्बन्धो न लिङ्गेन धूमेन सह सङ्गतः सम्बद्धः लिङ्गधर्म्मेण पक्षधर्म्म इत्यर्थः। एवं पराभिमतं साध्यं दूषयित्वा स्वाभिमतं साध्यमाह लिङ्गस्येति। धर्म्मेणाग्निना। अन्यत्र महानसादौ। तत्र पक्षे, सिद्धं लिङ्गं तद्युक्तमग्नियुक्तं धर्म्मिणं पर्वतं साधयिष्यतीत्यर्थः। अनुच्छिन्नसन्तत्यूर्द्ध्वगमनादीनामेव गमकत्वमस्मात् विशेषणोपयोगार्थमाह। सतात्पर्य्यमिति।

ननु शब्दो न द्रव्यमेकद्रव्यत्वादित्यत्रैकद्रव्यत्वस्यान्वयव्यतिरेकिणो व्याप्तिग्रहार्थं व्यतिरेकसहचार एव दर्शितः स न युक्तः अस्य केवलव्यतिरेकित्वाभावादत आह। एकद्रव्यत्वादिति। एकमात्रसमवायिकारणकत्वादित्यर्थः। अत्र शब्दान्तरहेतुत्वादित्यत्र भाष्यकारोक्तहेतावन्तरशब्दो विशेषवचनः स च विशेषोऽनाद्यत्वं तथा चानाद्यशब्दासमवायिकारणकत्वादित्यत्र वार्त्तिककारेण-

केवलव्यतिरेकिशङ्का कर्तव्या। समानजातीयारम्भकत्वं शब्दस्यासिद्धमतः साधयति। कार्यत्वादिति। [१२२। ४४]

कार्यत्वं पुनरस्यानुपलब्धिकारणाभावे सत्यनुपलभ्यस्योपलभ्यमानत्वाद् वा प्रत्यक्षाद्वेति। सर्वत्रोपलब्धिप्रसङ्गादित्यस्य विपर्ययेण हेतुः। प्रयोगस्त्वेवं अव्याप्यवृत्तिः शब्दः आश्रयप्राप्तावपि क्वचिदनुपलभ्यमानत्वे सति क्वचिदुपलभ्यमानत्वात् संयोगवदिति।

साधारणत्वमुक्तमिति द्रष्टव्यम्। अर्थान्तरत्वनिरासायाह। समानेति। नन्वनुपलम्भमात्रान्न साध्यसिद्धिः उपलब्धिकारणान्तराभावादपि तदुपपत्तेरित्यत आह। अनुपलब्धिकारणेति। तथा चानुपलम्भकारणान्तराभावान्न तेनान्यथासिद्धिरित्यर्थः। नन्वनुपलब्धेरुपलब्धिप्रागभावरूपायाः कारणमेव नास्ति अकारणकत्वे चाऽनुपलब्धिकारणभावेऽनुपलब्धिरिति भावः। अथवा नोपलब्धिप्रागभावग्राहकोऽयोग्यानुपलम्भो विवक्षितः। तर्हि तादृशानुपलब्धिविषयत्वेनैव कार्य्यत्व सिद्धे उपलभ्यमानत्वादित्यर्थः। (?)

अत्राहुः। अनुपलब्धिकारणाभावे सत्यनुपलब्धस्येत्यनेन योग्यानुपलम्भमात्रं विवक्षितं स च कादाचित्काभावग्राहकस्तदा यदि यत्रोपलम्भस्तदानुपलम्भः स्यात्। तथा च कादाचित्काभावग्राहकानुपलम्भविषयत्वादिति हेत्वर्थो विवक्षितः। प्रत्यक्षत्वादिति। जातिमत्त्वे सति बहिरिन्द्रियग्राह्यत्वाद्वेत्यर्थः। प्रसङ्गमात्रस्यासाधकत्वादाह। विपर्य्ययेणेति। आश्रयाप्राप्ताविति। गुणत्वेन हेतुविशेषणाद्वा-

यद्यपि चैतावन्मात्रेणैव गुणत्वं सिध्यति तथापि भाष्यकारीयो हेतुरुपेक्षितः स्यादित्यतोऽव्यापकतामात्रं प्रसाध्यैव प्रकृते लगयति । कर्णेति । [११२।१८

अत्रापि प्रयोगः । शब्दो वीचीतरङ्गन्यायेन कर्णशष्कुलीमन्तमाकाशदेशमासादयति प्रकारान्तराऽसम्भवे सत्युपलभ्यमानत्वादिति व्यतिरेकी ।

उदाहरणार्थं विवेचयति । इदं त्विति । [१२०।१७

सदाद्यभेदः सत्तायोगः । अनित्यत्वङ्कारणवत्त्वम् । सामान्यविशेषवत्त्वमिति ।

साधर्म्यमिणयस्मदादिभिः कदाचित्प्रत्यक्षेणानुप-

ह्युपचनेतन व्यभिचारः (१)। यद्वा। अनीश्वर विभुविशेषगुणत्वात् वह्निबुद्धिरितिविवक्षितं। (२) सर्व्वत्रोपलम्भप्रसङ्गस्य विपक्षे बाधकः। कर्णशष्कुलीमन्तमिति । यद्यपि कर्णशष्कुलीमदाकाशं न भिन्नमिति सर्व्वशब्दोपलम्भप्रसङ्गस्तदवस्थः तथापि कर्णशष्कुल्या सममाकाशस्य प्रत्यासत्तिः कापि वाच्या यथा कश्चिच्छब्दो गृह्यते कश्चिन्नेति स एवास्यार्थ इत्येके । शब्दत्वं गुणत्वावान्तरजातीयासमवायिकारणावृत्ति बहिरिन्द्रियग्राह्यविशेषगुणवृत्तिजातित्वाद्रूपवदित्यत्र तात्पर्य्यमित्यन्ये । सामान्यविशेषवत्त्वमिति । न चात्र विशेषपदवैयर्थ्यं समानानां हि भावः सामान्य जातिरूप उपाधिश्च । तद्विशेषो जातिस्तेन जातिमत्वादित्यर्थः । ननु यत्र व्याप्तिग्राहकप्रमाणायोग्योऽर्थोऽनुमीयते तत्सामान्यतोदृष्टमिति पूर्व्वमुक्तमिदानीं तूभयत्र

लम्भात्। (२३१) व्याप्तिग्राहकेण प्रमाणेनानुपलम्भादित्यर्थः।

आभिप्रायिकोऽर्थः पक्षधर्मताया विषयः। स एवाभिप्रायेण व्याप्यते येन विना प्रतिज्ञार्थो नोपपद्यते। उभयथा सम्भावनायामेकतरञ्च बाधकोपपत्तावन्यतरः प्रमाणान्तरविषयः[1] तत्र विधायकप्रमाणाभावे केवलव्यतिरेकिणोऽवतारः।

प्रत्यक्षेणानुपलभ्यमानोऽर्थोऽनुमीयते तत्सामान्यतोदृष्टमित्युच्यते इति विरोध इत्यत आह। व्याप्तिग्राहकेणेति। ननु द्व्यणुकं सकर्त्तृकमित्यनुमाने यथा पक्षधर्मताबलात्सर्वज्ञकर्त्तृसिद्धिः तथेच्छादयो द्रव्याश्रिता इत्यत्रापि पक्षधर्मताबलादेवाष्टद्रव्यातिरिक्तद्रव्यसिद्धि रस्तु विनिगमकविशेषाभावादित्यत आह। आभिप्रायिक इति। येन विनेति। पक्ष(धर्म)तावच्छेदकधर्मसामानाधिकरण्यं साध्यमानस्य येन विना न निर्वहतीत्यर्थः।

नन्वष्टद्रव्यानाश्रितत्वं हि पक्षविशेषणं कृत्वा यदेच्छादयो द्रव्याश्रिता इति साध्यते तदाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वादिना प्रतिज्ञार्थ एव नोपपद्यत इति पक्षधर्मताबलादेव विशेषसिद्धिरिति किं व्यतिरेकिणा। मैवं। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमाद्रव्याश्रितत्वेन प्रकारेण वस्तुतोऽष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वसिद्धावप्यष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारकप्रतीतेर्व्यतिरेकिणा साध्यत्वात्।

(१) गोचर इति पा० २ पु०।

तथाहि। क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्र सर्वज्ञत्वमन्तरेण क्षित्यादीनां सकर्तृकत्व(१)मेव नोपपद्यते परमाणवदृष्टादीनामज्ञाने तदधिष्ठानानुपपत्तेः। तदधिष्ठाने वाऽसर्वज्ञत्वानुपपत्तेः। तस्मात्सर्वज्ञत्वमन्तरेण प्रतिज्ञातार्थानुपपत्तौ तदभिप्रायकत्वं, आभिप्रायिकत्वाच्च पक्षधर्मतागोचरः। इच्छादयस्तु परतन्त्राः गुणत्वादित्यत्र पुनरात्मा नाभिप्रायव्याप्तः। न हीच्छादीनां क्षित्यादि(२)पारतन्त्र्यमसंभावितं, अपि तु

अन्ये त्वेव पक्षविशेषणाद् द्रव्याश्रितत्वमिच्छादिषु द्रव्याश्रितत्व मस्तु न तस्य द्रव्यस्याद्रव्यात्मकत्वं कुतः सिद्ध्यतीत्याहुः।

अत्र त्वेवं पक्षविशेषणं तच्च केवलव्यतिरेकिणोऽवकाश इत्यपरे।

तथाप्यसर्वज्ञकर्तृबाधसहकृतकार्यत्वं यथा [illegible]णुके सर्वज्ञजन्यत्वं साधयति तथाद्रव्यवृत्तित्वबाधसहाय गुणत्वमपि विशेषं साधयिष्यति विशेषाभावात्। सैव। अत्र सकर्तृकत्वविवादविषयाणां समानकालीनकार्याणामेव पक्षीकरणात्तावत्कारणाभिज्ञत्वस्यैव सर्वज्ञत्वरूपत्वात्। कल्पादिमारभ्य कल्पान्तपर्यन्तं यावत्कार्यप्राक्कालीनत्वस्यैव ज्ञानादिनित्यत्वात्तयोः पक्षधर्मताबलादेव सिद्धिः पूर्वं बाधाप्रतिसन्धानेऽपि सामान्यतो(स)दृष्टपर्यवसानाच्च।

(१) कर्तृत्वेति पा० २ पु०।

(२) पृथिव्यादि इति पा० २ पु०।

मानमप्रत्यक्षवेद्यत्वादि[1]भिर्बाधितं, धूमगतनीलत्वेनैव धूमस्यापालालत्वं[2]। तस्मादुभयथा सम्भवादात्मा नाभिप्रायव्याप्तः तदव्याप्तत्वाच्च न पक्षधर्मता तमङ्कमारोपयि[3]तुमर्हति. अपि त्विच्छादिसम्बद्धपरमात्रमादायैव निवर्त्तते। एतदुत्तरकालं क्षित्यादौ बाधिते तदन्यासिद्धौ विधायकप्रमाणाभावान्निषेधमुखेन व्यतिरेकी प्रवर्तते।

तमिमं विशेषं हृदिनिधायोक्तं। बाधकैरपनीते

अथ यथा सुरभिचन्दनमित्यत्र ज्ञानान्तरोपस्थापितविशेषणविशिष्टप्रतीतिः तथा सामान्याव्यभिचारमादाय साध्यान्तरोपनीत तत्तदन्यत्वाद्युपजीव्याष्टद्रव्यान्यत्रत्तित्वं परिकल्प्यतामत्रम। संस्कारान्नियमेनानुपास्यते.। तथापीच्छाद्याश्रयस्य निर्गन्धतया पृथिवीभिन्नत्वेन पक्षं विशिष्य तत्तद्बाधकबलात् प्रत्येकजलादिभिन्नत्वमिद्धावेकैकभिन्नत्वेन पक्षविशेषणादिशिष्य सेत्स्यति। मैवम्। इच्छाद्याश्रय तद्भिन्नमजानत इच्छादि पृथिव्याद्यनाश्रितत्वज्ञानादनमित्युदयात्।

नन्विच्छादिक पक्षीकृत्य द्रव्याश्रितत्वं साध्यते न त्वाश्रितत्वम

(१) प्रत्यक्षत्वादि इति पा० २ पु०।

(२) धूमगतनीलत्वेनैव पलालत्वमिति पा० २ पु०।

(३) मारोहयितुमिति पा० २ पु०।

द्रव्याष्टकगुणत्व इति। १२३।१४। ननु सामान्यतोदृष्टाद्यद्रूपं सिद्धं न तत्केवलव्यतिरेकिणः साध्यं यादृशञ्च तेन[1] साध्यं तादृशञ्च क्वचिन्न सिद्धं तथा चाप्रसिद्धविशेषणः पक्षः न च तथाभूते सन्देहोऽपि कारणाभावात्। समानासमानधर्मविप्रतिपत्तीनामनुपलब्धचरत्वा[2]दि-त्यत आह। यद्यपि चायमिति। स्वरूपेण असा-धारणरूपेणेत्यर्थः।

न [illegible] [illegible] स्यापूर्वतया पदार्थानां विशेषण-

तस्याप्रसिद्धावपि न दोषः साध्याप्रसिद्धौ वा कोऽनुमानाद्धर्ति रित्यत आह नन्विति यद्रूप व्याप्तितत्त्वमित्यर्थः। यादृश मिति। अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वमित्यर्थः। साध्याप्रसिद्धः दोषमाह। तथा चेति। तथा च साध्याप्रसिद्धौ तत्सन्देहाभावात् पक्षत्वाभावे लिङ्गस्य पक्षधर्मताज्ञाने नास्तात्यनुमितिसामग्री। नास्तीत्यर्थः। उपलक्षणञ्चैतत् साध्याप्रसिद्धौ तत्प्रवृत्तेरज्ञानात् तत्सहचारज्ञाने व्याप्तिग्राहकमप्यस्तीति द्रष्टव्यम्। ननु स्वरूप-मात्मनः प्रसिद्धत्वे तेनात्मा प्रसिद्ध एवेत्यत आह। असाधारण नेति। ननु द्रव्याष्टकव्यतिरेकादिशब्दानामगृहीतसङ्गततया स्वार्थानुपस्थापनात् न ततः साध्यप्रसिद्धिरित्यत आह। न हीति।

[1] ज्ञानिवर्तकेणेति पा० [illegible] पु०।

[2] [illegible] [illegible]चरत्वादिति पा० [illegible] पु० [illegible] विषयत्वादिति पु० प

**विशेष्यभावो विहन्यते तथासत्यन्वयिनोऽप्यनुत्थान-
मितिप्रलीनमनुमानेन । न च द्रव्याष्टकातिरिक्तादि-
पदार्था एवापूर्वा येनाप्रसिद्धविशेषणता स्यात्पक्षस्य ।
न चैवं सति शशशृङ्गधनुर्द्धरादावपि प्रसङ्गः तत्रापि
पदार्थमात्रप्रसिद्धेः सर्वत्र सुलभत्वादिति वाच्यम् ।
सामान्यतोदृष्टपूर्वकत्वनियमसीमाया दुर्लङ्घ्यत्वात् ।
अन्यथा सामान्यतोऽप्यसिद्धः कथं निःप्रमाणकशब्द-
सामर्थ्यमात्रमाश्रित्य परामृश्यते । अपरामृष्टश्च कथं**

अत्र न पदार्थः साध्यः किन्तु वाक्यार्थः स च सर्वत्राप्रतीत एव
प्रतीयत इत्यर्थः

तथा सतीति । पर्वतोऽग्निमानितिवाक्यार्थस्याप्रसिद्धत्वादि-
त्यर्थः । न च पदार्था एवाप्रसिद्धा येन तत्पदानां सङ्केताग्रहान्न
ततः तदुपस्थितिः स्यादित्याह । न चेति । सामान्यतोदृष्टेति ।
न च पदार्थज्ञानं साध्यप्रसिद्धिरित्युच्यते किन्तु वाक्यार्थज्ञानं,
तच्च शशशृङ्गधनुर्द्धर इत्यादावयोग्यताज्ञानान्नास्ति तदसत्वकाले
तत्रान्वयज्ञाने सामान्यतोऽपि न प्रमाणसिद्धं तु धर्मिणि सामान्यतो
दृष्टप्रवृत्तौ मानमस्त्येवेति विशेष इत्यर्थः । न च वाक्यार्थाप्रसिद्ध्या
वाक्यप्रयोगकारणज्ञानाभावाद्वाक्यप्रयोग एव न स्यादिति वाच्यम् ।
प्रत्येकपदार्थज्ञानेनैव तद्वाचकतत्प्रत्येकप्रयोगेनाकाङ्क्षादिसाहित्या
त्तत एव व्युत्पन्नस्य वाक्यार्थज्ञानोदयात् तस्य च व्यतिरेकिमान-

प्रमाणव्यवहारमवतारयेत । तदिदमुक्तं अदूरविप्रकर्षेण परामृष्ट इति ।

विशेषसिद्धः सामान्यसिद्धिरदूरविप्रकर्षस्तदसिद्धिस्तद्विपर्यय इत्यर्थः ॥

एवञ्च संशयोऽयं न वादिविप्रतिपत्तेरेव सम्भ. इच्छादीनामुभयवादिसिद्धे सामान्यतोऽधिकरणे द्रव्याष्टकातिरिक्तानतिरिक्तकोट्युल्लेखाभ्यां समुत्थापनात् । अथवा प्रत्येकं ...तः संशयः समुदाये विश्राम्यतीति न्यायः ।

विषयत्वाद्बाधनाभावाच्च प्रमात्वात् । विशेषसिद्धेरिति । अत्र क्वचित् इत्यध्याहार्यं । अष्टद्रव्यातिरिक्तद्रव्याश्रितत्व विशेष तत्सिद्धेश्च सामान्यस्य द्रव्याश्रितत्वस्य सिद्धिरदूरविप्रकर्ष इत्यर्थः । तदसिद्धिरिति । शशशृङ्गादौ सामान्यतोऽपि असिद्धत्वात् इत्यर्थः । एवं चेति । इच्छाश्रयो द्रव्यमष्टद्रव्यातिरिक्तं न वेति विप्रतिपत्तिरूपवाक्यस्याकाङ्क्षादिमतोऽप्यन्वार्थप्रतिपादकत्वादाश्रयसिद्धौ तत्कोटिकः संशयस्तद्व्यतिरेकनिरूपणं च उपपद्यत इत्यर्थः । अथ वेति ।

ननु कोऽस्यार्थः अथ वेति । किमिच्छा जलवृत्तिर्न वेत्याद्येव प्रत्येकविषयः संशयः अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न वेति समुदायविषयः यद्वा समुदायविषयसंशयान्तरजनकः ? इयमप्यष्टद्रव्यातिरिक्त द्रव्यासिद्धेर्न युक्त । तत्राहुः । इच्छाया गुणत्वेन द्रव्यवृत्तित्वसिद्धौ

तथाहि गुणत्वं पृथिव्याश्रिते गन्धादौ तदतिरिक्ताश्रिते शब्दादौ च दृष्टमिच्छादिषु च दृश्यते तत्किमिच्छादयः पृथिव्याश्रिता उत तदतिरिक्ताश्रिता इत्यनेनाकारेण सर्वद्रव्येषु भवनसंदेहः समानधर्मदर्शनादेव

तद्द्रव्यं जलभिन्नं न वेति जलभेदोपस्थितौ क्रमेण विशेषविशेष्यज्ञानसामग्रीसत्त्वादन्त्यकोटौ साध्यप्रसिद्धिः । यद्वा इच्छा पृथिव्यामाश्रिता तदतिरिक्ते वा । तदतिरिक्तेऽपि जले अन्यत्र वेत्यादिक्रमेण प्रत्येकसंशये सत्येकैकाश्रितत्वस्य तदन्यत्वक्रमेण विशिष्टत्वस्य चोपस्थितौ समूहालम्बनादिच्छाष्टद्रव्याश्रिता तदतिरिक्ताश्रिता वेति संशयः । न चैवं पृथिव्यादिवृत्तिताकोटेरपि संशयादेवोपस्थितौ बाधसत्प्रतिपक्षान्यतरप्रसङ्गः, संशयोपस्थितकोट्या बाधाद्यभिधाने सकलानुमानोच्छेदप्रसङ्गात् । अथवा इच्छा अष्टद्रव्याश्रितातिरिक्ता न वेति संशयादिच्छायामष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तं द्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । तद्द्रव्यवतीच्छेति साध्यते । न चैवं संशयादेव साध्यप्रसिद्धौ किं व्यतिरेकिणेति वाच्यम् । निश्चयार्थं तत्प्रवृत्तेः । नन्वेतावता संशयेन साध्यप्रसिद्धावपि न तत्कोटिकः संशयः तस्य कोटिनिश्चयपूर्वकत्वात् न वा तादृशी प्रसिद्धिर्व्यतिरेकनिश्चयहेतुः तस्य साध्यनिश्चयजन्यत्वात् साध्यसन्देहे तद्व्यतिरेके संशयस्यावश्यकत्वात् । अपि च संशयोपस्थितसाध्यव्यतिरेकनिरूपणे न योग्यानुपलम्भात् साध्यनिश्चयं विना योग्यानुपलम्भाभावात् ।

द्रव्याष्टकतदतिरिक्तयोर्द्वयोरेव पर्यवसितो भवति। तदिदमुक्तं धर्मिणि चेत्यादि।

विभागवचनादेवेत्यादिभाष्यपङ्क्तिव्याख्यायाः शङ्का-पोषणे तात्पर्यम् ।

नापि तद्व्यापकत्वाभावात्, साध्यनिश्चयं विना तद्व्यापकत्वानिश्चयात् अतएव वादिवाक्यादेव साध्यप्रसिद्धिरित्यपास्तम् । वादिनोऽनाप्तत्वेन तद्वाक्यस्य संशायकत्वात् । अन्यथा तत एव साध्यसिद्धौ हेत्वादि वैयर्थ्यात्   स्वार्थानुमाने वाक्याभावाच्च ।

अत्र सिद्धान्तरहस्यम् । इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छा-धारतायाः अभावे तद्द्रव्यं पृथिव्याद्यष्टद्रव्यभिन्नसमवायवृत्तिधर्मवत्त्वात्, पृथिव्यादिषु बाधकवत्त्वादष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं साध्यते । द्रव्यत्वं न साध्यप्रसिद्धिः । न चैवमन्वयाप्रसिद्धिः, अन्वयव्याप्त्य-प्रतिसन्धानदशायां व्यतिरेकसामर्थ्यवत्त्वात् । नापि द्रव्यत्वात् सपक्षादिवृत्तित्वादसाधारण्यं तद्धि साध्यतदभावोभयसाधकत्वेन सत्प्रतिपक्षतया दूषणं प्रकृते च हेतौ साध्याभावसाधकत्वं न, विपक्षे बाधकाभावात् । अतएव सर्वत्र व्यतिरेकिणि तत्प्रमेय-त्वादिना सत्प्रतिपक्षः, विपक्षबाधकेन व्यतिरेकिणो बलीयस्त्वात् । व्यतिरेकिणि तृतीयलिङ्गपरामर्शोपपत्तिः व्यतिरेकव्याप्तौ च साध्यप्रसिद्धिं लक्षणे वक्ष्यामः ।

ननु पूर्ववदादिविभागवचनादेव त्रैविध्यं लिङ्गे त्रिधर्मिति किमर्थमित्यर्थक ऋजुभाष्यं कुतो वक्रगत्या व्याख्यायत इत्यत आह शङ्कापोषणे इति । पूर्ववदादित्वपदव्याख्यानमेव शङ्का

नन्‌ सदसदती तत्वमित्यत्र सदसच्छब्दाभ्यां भावाभावावुक्तौ तदिह वर्तमानार्थत्वव्याख्यानं तद्विरुद्धमपि कुत उपादीयत इत्यत आह। प्रत्यक्षं हीति। १२३।८

अथ तथैव किं न स्यादित्यत आह। यद्यपीति। न विशेषणत्वं स्वातंत्र्येण, १२।१८ स्वातंत्र्याभिधानेनेत्यर्थः।

आहो न्यायोप्यस्तीत्यस्याक्षरार्थेन नञः सम्बन्धानुपपत्तेः तात्पर्यार्थेन सम्बन्धमाह। न सन्देह इति। [१२४।१६

न्यायाभावेन[1] तर्कस्य निश्चयापर्यासौ सन्देहस्तदवस्थ इत्याशङ्कितमतस्तन्निषेध एवोत्तरं युक्तमिति।

पुष्टि। ननु प्रत्यक्षस्य वर्त्तमानार्थत्वमुक्तमेव, कुतः पुनरुच्यत इत्यत आह। नन्विति। ननु स्वातन्त्र्यमवृत्तित्वमेवेति साध्य विशेषणत्यत आह। स्वातन्त्र्याभिधानेनेति। तथा च स्वातन्त्र्यपदेनावृत्तित्वमुक्तं न तु तत्साध्यमित्यर्थः। ननूपस्थितेन न्यायोपस्थित्यनेन निषेधान्वये सम्भवत्यनुपस्थितेन सन्देहेन तदन्वयः किमर्थमुक्त इत्यत आह। आहो इति। अत्र न्यायाभिधानादुपस्थितेन न्यायेन निषेधान्वयोऽनुपपन्न इत्यर्थः। निषेध्यसन्देहोपस्थित्यर्थमाह। न्यायाभावेनेति। यत्किञ्चिन्न्यायस्य सन्देहाविरो-

(१) अनवस्थारूपस्येति प. २ पु.।

अस्त्येव न्यायः सन्देहविरोधिनिश्चयसमर्थो यत इति शेषः। निमित्तत्वं यदि विषयत्वं तन्नात्मनि दृष्टान्ते। अथोपादानत्वं न तत्साध्ये समवाय इत्यत आह। निमित्तत्वं कारणत्वमिति।

ननु व्यापकत्वं परममहत्परिमाणयोगः सर्वसंयोगिसमानदेशता वा। तदुभयमपि समवाये न सम्भवतीत्यत आह। सत्युपलब्धीति। १४।१८

उपलभ्यत्युच्यमाने घटादेरपि व्यापकत्वप्रसंगोऽत(१) उक्तं सर्वत्रेति। देशस्यावच्छेदकतामात्रेण सप्तम्या निर्देशो वने सिंहनाद इतिवत्। तथाप्यसिद्धं लक्षणं न ह्यात्मादयः सर्वत्रोपलभ्यन्ते इत्यत उक्तं सत्युपलब्धिकारण इति। तथापि विपक्षस्याप्युपलब्धि-

धित्वाद्व्याहरति। सन्देहेति। सन्देहोऽपि प्रकरणात् पक्ष एव द्रष्टव्यः। विशेषवाचकस्य सामान्यपरत्वे हेतुमाह। निमित्तत्वमिति। अन्यत्र कृतव्यापकत्वलक्षणपरित्यागे हेतुमाह। नन्विति। महत्त्वपरमत्वं नित्यत्वम्। सर्वसंयोगीति। सकलमूर्त्तसंयोगीत्यर्थः। देशस्य चेति। संयोगीति शेषः। तथापीति। यद्यपि कारणान्तरसमवधाने सर्वत्रोपलब्धस्य सर्वत्रोपलभ्यता नासिद्धा नहि सर्वदेशत्वम्। नापि यत्र देशे न कदापि कारणान्तरसमवधानं नोपलभ्य

(१) प्रसङ्गात इति पा० २ पु०।

कारणत्वाद्यत्र घटादि परमाण्वन्ताः स्वोपलब्धिसामग्री-सहितास्तत्र तत्रोपलभ्यन्त एवेति नैव व्यभिचार इत्यत उक्तं अन्तरेति। एतच्च द्रव्यरूपकारणान्तराभिप्रायेण द्रष्टव्यम्। अन्यथा यत्र घटादयो न सन्ति तत्र ततोऽन्यस्य तदुपलब्धिकारणस्य तादिन्द्रियसंयोगस्याभावादेव तेषामनुपलम्भः तद्भावे तु सर्वत्रोपलम्भ इत्येतदपि आशंक्येत। तथापि परमाण्वादिगुणैरेव यावद्द्रव्यभाविभिराश्रयाधीननिरूपणैर्व्यभिचारस्तन्निवृत्त्यर्थमनेकसम्बन्धे सतीति द्रष्टव्यम्।

एतच्च सर्वत्रेत्यनेन टीकाकृता सूचितम्।

यद्यपि च सर्वत्रास्तित्वं व्यापकत्वं तथापि लक्षणमन्तरेण तद्दुरवबोधमिति तदेवोक्तमिति। न्यायेति-

मानससिद्धविशेषणोपादानेऽप्यसिद्धत्वस्य दुर्निवारत्वात् तथापि यत्र यत्र देशे कारणान्तरसमवधानन्तत्रैवोपलभ्यमानत्वमेव विवक्षितम्। अन्तरेणेति। घटादयस्तु स्वोपलब्धिसामग्रीसहिताः स्वसत्त्व एव सर्वत्रोपलभ्यन्त इति न तत्रातिव्याप्तिरिति भावः। अनेकसम्बन्ध इति। नन्वनेकसम्बन्धो न संयोगः सामान्यसमवाययोस्तदभावात्। नापि समवायो व्योमादावभावात्। नापि यथाकथञ्चित् परमाणुगुणेष्वपि सम्भवात्। किञ्चात्मन्यव्याप्तिः सुषुप्तौ द्रव्यान्तरमनःसंयोगादिसमवधानेऽनुपलम्भात्। आकाशादौ च तादृशद्रव्यान्तरस्यासम्भवः। अपिच परमाणुगुणेषु परमाणूपलब्धि-

कर्त्तव्यताभूतं तर्कं पृच्छति। (२४, २५) **कथं** अव्यापार्यमाणकरणस्य स्वयं व्यापारायोगादित्याशयवानिति भावः।

अथोक्तमनवस्थाप्रसङ्गमवतारयितुं किमित्यनाधारत्वप्रसङ्ग उच्यते यावता स्वतन्त्र एवायं प्रसङ्गः किं न स्यात्। न हि कार्यस्यानाधारत्वमस्पष्टमेवेत्यत आह। स्यादेतदिति। पश्चात्तुर्या (……) संयुक्त इति शेषः।

कारणसमर्वि तु परमाणुनिरूपणम्। नापि सर्वत्रास्तित्वं व्याप्य व्यापकत्वं वा तद्धि न सर्वाधेय व्योमादावनाधेये तत्सम्भवात्। नापि सत्सम्बन्धित्वं यथाकथञ्चित्सत्सम्बन्धस्य रूपादावपि सत्त्वात् विशेषस्य दुर्वचत्वात्। प्रत्याहुः। विशेष्यान्यत्वे सति विभुभिन्न सामान्यवदन्यभावत्वं व्यापकत्वं सामान्यसमवायभिन्नाविभुभाव-भिन्नत्वं वा व्यापकत्वं वा। पक्षेऽप्येतत्सामान्येन व्यभिचरति तथाप्यनाश्रितः समवायः द्रव्यादिपञ्चान्यत्वात् अभाववदित्यत्र तात्पर्यम्। अनवस्थैव विपक्षबाधकस्तर्कः। इतिकर्त्तव्यतापेक्षायां हेतुमाह। कर्त्रेति। कर्त्तृव्यापारस्य विषयस्यैव करणत्वादित्यर्थः। उत्पन्नः पटः पश्चात्तुर्य्यत्र क्रियाकाङ्क्षायां समवेतस्तिष्ठतीति-क्रियान्वयविरोधः स्यादिति क्रियामध्याहरति। संयुक्त इतीति। ननु समवेतं कार्य्यं कदाचिन्न दृश्यते इति शङ्कमान आह।

न ह्युत्पन्नोप्य[1]संयुक्त एव तुर्या प्रथमे क्षणे पट इति कस्यचिन्निश्चयः अथ च प्रमाणवलादिष्ट एवायमर्थः, तथोत्पन्नोपि प्रथमे क्षणे तन्तुष्वसमवेत एवेति प्रमाणबलादेवेष्यत इति पादौ प्रसार्य तिष्ठतो नेद-मुत्तरमित्यर्थः। तस्मादनवस्थाप्रसङ्गावतारणायैवेद-मुक्तमित्याह। समवायश्चेतौति ४।२५

यद्युपाधिकथनेनैव वृत्तिमत्त्वस्य प्राप्तिधर्मत्वं निरा कृतं तथापि प्राप्तित्वस्यानैकान्तिकत्वसूचनाय पुनरप्य-नवस्थाप्रसङ्गमवतारयति। अथेति। अनवस्थाभि-याऽवश्यमन्ततः काचित्प्राप्तिश्च न च वृत्तिमती[2]ति स्वीकर्तव्यं ततस्तयैव प्राप्तिमत्त्वमनैकान्तिकमित्यर्थः।

उत्पन्नोपीति। यथा तुर्य्यामह पटस्य संयोगादर्शनेप्यौपपत्तिकी तथा कल्पना तथा प्रकृतेपीत्यर्थः। नेदमिति। अनाधारत्व प्रसङ्ग नोत्तरमिष्टापादनत्वादित्यर्थः। ननु समवायश्चेत्यादि वार्त्तिकस्य नानवस्थार्थ द्रव्यपदार्थव्याख्यानं कुत इत्यत आह। तस्मादिति। गोत्वादौ वृत्तिमति साध्याव्यापकत्वात साध नावच्छिन्नसाध्यव्यापकं कार्य्यत्वमुपाधिरिति भावः। ननु हेतु हौनदृष्टान्तमात्रादनवस्था न युक्तेत्यत आह। अथेति।

(१) न ह्युत्पन्नोऽस्येति पा० २ पु०।

(२) प्राप्तिर्न वृत्तिमतीति पा० २ पु०।

अथानवस्थास्वीकारे को दोष इत्याशङ्क्य निराकरोति। नन्वियमिति। (१४) अनादितया ह्यङ्कुरोत्पादानुगुणसमयसम्भविना बीजेन जनितेऽङ्कुरे वर्त्तमानमङ्कुरत्वं तस्य बीजपूर्वकत्वं बीजोत्पादानुगुणसमयसम्भविना चाङ्कुरेण जनिते बीजे वर्त्तमानं बीजत्वं तस्याङ्कुरपूर्वकता अवगमयती[१]ति युक्तं, अविकल्पस्य हेतोः प्रमाणस्य विद्यमानत्वात्। इदमप्रथमतां तु कार्योत्पादानुगुणसमये भविष्यत्प्रवाहस्यासत्वात

अनवस्थात्वमेव नाङ्गीकारे तत्त्वं बीजाङ्कुरादौ तस्याः स्वीकारात् अत शङ्कामात्रं निरस्यतीत्यर्थः। अनादितयेति। यद्यपि द्वितीयादिबीजादौ सिद्धेति नानवस्था तथापि योऽङ्कुरः सबीजपूर्वकः यद्वा तत्तदङ्कुरपूर्वकमिति व्याप्तिग्राहकमानेन सामान्यतोऽनवस्थाग्रहात् समवाये च तया समानमस्ति। आद्यसमवायपक्षीकरणे साधनावच्छिन्नसाध्यव्यापकस्य कार्यत्वस्योपाधिकत्वात्। द्वितीयसमवायपक्षे चाश्रयासिद्धत्वात्। अतएव समवाये न तावदुत्पत्त्यानवस्था तस्याजनकत्वात्। नापि ज्ञप्तावनवस्था समवायानां परस्परानपेक्षज्ञानत्वेनैकदा ज्ञानादिति दूषणमपास्तम्। सम्बन्धानां सम्बन्धिनिरूपणनिरूप्यत्वेनैकदा ज्ञानाभावात्। समवायो यदि सामान्यविशेषान्यत्वे सति समवेतः स्यात् द्रव्याद्यन्यतमः स्यादिति

(१) ता गमयतीति पा० २ पु०।

प्रथमस्यानुत्पादे तदाश्रयस्य हेतोस्तस्मिन्नसत्याश्रयासिद्धतया सर्वस्यागमकत्वे प्रमाणाभाव इत्यर्थः ।

अभ्युपेतकणादासत्त्वस्य शास्त्रविरोधश्चेत्यादि । (२२५ । ७)

कार्यमकृतकसम्बन्धवदिति प्रतिज्ञायां घटादेर्भूतलादिनाप्यकृतक एव सम्बन्धः स्यात्स चानिष्ट इति प्रतिज्ञां विशिनष्टि । स्वोपादानेनेति । (२२५ । ८) स्वसमवायिनेत्यर्थः । कार्यमिति च समवेतमात्रोपलक्षणपरं । अन्यथा जात्यादिषु विपक्षेषु सम्भवे हेतोर्विरोधः स्यात्

अथवा[1] प्रतिज्ञा यथाश्रुतैव । आधारवत्त्वादित्यत्रा-

समवायाव्यवस्थयानवस्थेत्यन्य । अभ्युपेतेति । अन्यस्य शास्त्रविरोधस्यादोषत्वादित्यर्थः । भूतलादिनापीति निर्विशेषिताहेतुकसम्बन्धे साध्ये भूतलादिनाप्यकृतकः सम्बन्धः स्यादित्यर्थः । नन्वाधारत्वस्य हेतोर्जात्यादावपि सत्त्वात् समवायिकारणेनाकृतकसम्बन्धस्य च साध्यस्य तत्राभावाद्व्यभिचार इत्यत आह । समवायिनेति । ननु कार्यत्वेन ध्वंसस्यापि पक्षान्तर्भावात्तस्य चाऽसमवेतत्वेन भागे बाधः स्यात्, जातिसाधारण्यञ्च न सिध्येदित्यत आह । कार्य्यमितीति तेन ध्वंसस्यापक्षत्वाज्जात्यादेरपि पक्षत्वाच्च नोक्तदोष इत्यर्थः । अन्यथेति । उपादानपदस्य यदि समवायिकारणसत्त्व इत्यर्थः । अस्तु वेति । भावकार्य्यमात्रं वा पक्षः उपादानपदं समवायिकारण-

(१) अस्तु वेति प्रकाशसम्मत पाठः ।

धारशब्देन नाश्रयमात्रं विवक्षितं, किं त्वधिकरणं कारकं(१)। तेनाधिकरणकारकत्वादित्यर्थः। न च वाच्यं कारकत्वमात्रेणैव पर्याप्तौ किमधिकरणग्रहणेनेति; प्रध्वंसेन विरोधप्रसङ्गात्। न कार्यस्य [१२५।१४] कार्यः सम्बन्ध इत्यर्थः। मिथः सम्बध्येते आधाराधारभावेनावतिष्ठेते(२) इत्यर्थः। सोऽपि नास्ति [१२५।१५] समवाये समवायान्तराभावादित्यर्थः। सन्नप्यसौ न कार्यमाधारवत्करोति, स्वसमवायेनैव तस्याधारव-

परमेवेत्यर्थः। तेनेति। यस्याधिकरणत्वादेव प्रत्यधिकरणस्य कारकत्वमात्रं विवक्षितं, ज्ञानादि तु साधिकरणमपि न तत्प्रत्यधिकरणं कारकमपि, न तेन विरोध इत्यर्थः। प्रध्वंसेनेति। यद्यपि ध्वंसस्याधिकरणमस्ति तथापि न प्रति तत्र कारणमाश्रयनाशजन्यत्वेन प्रत्यधिकरणस्य व्यभिचारादित्यर्थः। न चाकृतकसम्बन्धत्वमप्रसिद्धमिति वाच्यं, समवायो नित्यो निःसामान्यसत्त्वात् सामान्यवदित्यतोऽनवस्थाप्रसङ्गसहकृतादकृतकसम्बन्धत्वस्य कार्यत्वेऽनुमानादिति भावः। ननु कार्यस्य कारणेन समवाय इति स्वतोऽसिद्ध इत्यत आह। कार्यस्येति। ननु सहोत्पन्नयोरपि रूपस्पर्शयोर्मिथः सम्बन्धोऽस्त्येव। एकार्थसमवायस्य तयोः सिद्धत्वादित्यत आह। आधारेति। सोऽपीति। एकार्थसमवायोऽपीत्यर्थः। अत्र हेतुमाह। समवायान्तरेति। अनवस्थाप्रसङ्गादित्यर्थः। सन्नप्यसाविति। असावीति। एकार्थसमवायः। स्वसमवायेनैवेति। तस्य कार्यस्य सम

(१) कारकमिति २ पु० नास्ति।

(२) आधाराधेयभावेन व्यवतिष्ठेते इति प० २ पु०। अयमेव प्रकाशसम्मतः।

त्वात। तदभावे त्वेकार्थसमवायोपि न स्यादित्यर्थः। सहोत्पादे कार्यमनाधारं स्यात्सवेतेति शेषः।

समवायिकारणाभावेऽसमवायिकारणशङ्कापि नास्ति, तत्प्रत्यासन्नस्वभावत्वा[1]त्तस्येत्यभिप्रायवता तदुपेक्ष्य निमित्तमात्रादुत्पत्तिराशङ्क्य निराकृता।

ननु विधीयमाननिषिध्यमानव्यतिरेकेण जगति न स्वतन्त्रा नाम, तत् कथं धर्मचैविध्यमित्यत आह। अच्चेति। ...... विधीयमानो वर्त्तमान इत्यर्थः प्रतिषिध्यमानः अवर्त्तमान इत्यर्थः। तच्च ये वर्त्तमानास्तेषां कोऽस्त्वपरतन्त्रो वृत्तिमानित्यर्थः। कश्चित स्वतन्त्रा

यायत्व, ननु समवायान्तरेणासाधारणत्वादित्यर्थः। तदभावेत्विति। कार्य्यस्याधारे समवायादित्यर्थः। एकार्थसमवायस्तदा स्याद्यदि कार्य्यस्य समवायः स्यात् स च कार्य्यस्य सहोत्पन्नो न वेति कार्य्यस्येत्युक्तमितिभावः। नन्वाश्रयनाशानाश्यकार्य्याणामेकस्मिन् लक्षणेऽनाधारत्वमिष्यत एवेत्यत आह। सर्व्वदेति। चैविध्यकमदर्शनोपयोगार्थमाह। नन्विति। ननु यदस्तु न विधीयते नापि प्रतिषिध्यते तद्विधीयमानप्रतिषिध्यमानाभ्यामतिरिक्तमस्तीति विभागो न युक्त इत्यत आह। विधीयमान इति। तथा च वर्तमानावर्तमानाभ्यां तृतीयकोटिरस्तीत्यर्थः। वृत्तिमान् समवेत इत्यर्थः।

[1] तत्प्रत्यासन्नत्वादिति पा० २ पु०।

LIST OF SANSKRIT WORKS ON NYĀYA

PUBLISHED IN

THE BIBLIOTHECA INDICA.

Work No. 199.

(In progress.)

1 ANUMANA-DIDHITI PRASARINI.
  Author Krsnadasa Sarvabhauma
  Editor Pandita Prasanna Kumara Tarkanidhi
  3 fascicles issued (1911 1912).
  Price Re 0-12-0 per fasc Total Rs 2-4-0

(Fascicles all available.)

N.B. The work is technically "in progress," that is, discontinuation has not been decided on Practically, progress has been in suspense since 191.

Work No. 8.

(Completed.)

2 BHASA-PARICCHEDA.
  Author Visvanatha Tarkapancanana
  Editor Dr E. Roer
  2 fascicles issued (1850)

(Completely sold out.)

Work No. 200.

(In progress.)

3 KIRANAVALI
  Author Udayanacarya
  Editor M. M. Siva Candra Sarvva-bhauma
  3 fascicles issued (1911-1912)
  Price Re 0-12-0 per fasc Total Rs 2-4-0.

(Fascicles all available.)

N.B.—The work is technically "in progress," that is, discontinuation has not been decided on Practically, progress has been in suspense since 1912

Work No. 171.

(In progress.)

4 NYAYA-BINDU, by Dharmakirti
  With commentary by Vinita-deva. (Tibetan translation of original Sanskrit text.)
  Editor L. de la Vallée Poussin

2 fascicles issued (1908–1913).
Price Re 1-0-0 per fasc Total, Rs 2-0-0

(Fascicles all available.)

N.B.—The work is technically "in progress," that is, discontinuation has not been decided on. Practically, progress has been in suspense since 1913. The text however is complete in the two fascicles published. The work needs completion by appendices announced on the title page.

Work No. 230.

(Completed.)

5. NYĀYABINDU INDEX
   Compiler M. M. Satīśa Candra Vidyābhūṣaṇa
   1 fasciculus issued (1917)
   Price. Rs 2-0-0

(Fascicle available.)

This is a bilingual index in Sanskrit and Tibetan, giving a concordance of the terms occurring in the original text and in the Tibetan translation.

Work No. 128.

(Completed.)

6. NYĀYA BINDU-ṬĪKĀ
   Author Dharmottara Ācārya.
   Editor Peter Peterson
   1 fasciculus issued (1890).

(Completed; sold out.)

Work No. 123.

(Completed.)

7. NYĀYA KUSUM-AÑJALI
   Author Udayanācārya
   Editor Candra Kanta Tarkalankāra
   9 fascicles Vol I fascs I–VI and Vol II fascs I–III issued (1888–1895)
   Price Vol II fasc III Rs 1-8-0 remaining fascs Re 0-12-0 each. (Volume I fasc I–VI sold out.)

(Fascicles not all available.)

Work No. 50.

(Completed.)

8. NYĀYA-SŪTRA
   Author Gautama
   Editor Paṇḍita Jayanārāyaṇa Tarkapañcānana
   3 fascicles issued (1864–1865)

(Completed; sold out.)